
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

९०८

आदित्यपुराण पु. २५०

आदि०
५०
६३

श्रीगणेशाय नमः ॥ ऋषय ऊचुः ॥ श्रुतमस्माभिरखिलं स्नानं माहेश्वरं महत् ॥ वर्णाश्रमविधिश्चैव प्रायश्चित्तं विशेष
तः ॥ १ ॥ इदानीं श्रोतुमिच्छामि विवाहं गिरिजापतेः ॥ २ ॥ सूत उवाच ॥ यदुवाच पुरा देवः पृष्टो मार्तण्डसूनुना ॥ स्तुत्वा
च स्तोत्रवर्येण तच्छृणुध्वं द्विजोत्तमाः ॥ ३ ॥ मनुरुवाच ॥ भगवन् यच्च यत्पृष्टं तत्तथैव त्वयोदितं ॥ श्रुतं तदखिलं ता
त हृदि तच्च स्थिरीकृतं ॥ ४ ॥ जानासि त्वं भगवतो माहात्म्यं पार्वतीपतेः ॥ त्वामृते नापरः कश्चिद्वेत्ता स्तौति सर्वश्रुतिः
॥ ५ ॥ त्वमीशस्यापरा मूर्तिर्यतोसि परमेश्वर ॥ अतस्त्वमेव जानासि महिमानं महेशितुः ॥ ६ ॥ त्वमेव रुद्रः पुरुषः
परं ब्रह्म सनातनं ॥ नीलग्रीवो महादेवः शरण्यो गोपतिर्विराट् ॥ ७ ॥ प्रपद्ये त्वामिहेशानमुग्रं शर्वं कपर्दिनं ॥ त्वां न
मामि परं हंसं पशूनां भर्तारमीश्वरं ॥ ८ ॥ सर्वेषां वरदं शंभुं शिवं परमकारणं ॥ त्वामहं शरणं यामि सहस्राक्षं हिरण्म
यं ॥ ९ ॥ सूर्यं प्रभाकरं भानुं ज्योतिष्मंतं दिवाकरं ॥ हिरण्यबाहुं जटिलमोंकारं स्वं प्रचेतसं ॥ १० ॥ अंबिकापतिमीशा
नं ज्योतिषां ज्योतिरव्ययं ॥ सर्वपापक्षयकरं परं ब्रह्म सनातनं ॥ ११ ॥ ब्रूहि मे देवदेवेश विवाहं परमेष्ठिनः ॥ काली हैमव
ती गौरी पुनर्जाता कथं विभो ॥ १२ ॥ मनुरुवाच ॥ पृष्टं यत्त्वया वक्ष्यामि शृणुष्व मनुजेश्वर ॥ सर्वेषां स्मरणाद्देव देहिनां
मोक्षसाधनं ॥ १३ ॥ य एतैर्नामभिर्भक्तः प्रातः सुनियतात्मवान् ॥ तस्य पापं क्षयं याति लक्ष्मीश्चैव प्रवर्द्धते ॥ १४ ॥ सर्वरो
गविनिर्मुक्तो जीवेद्वर्षशतं नरः ॥ देहावसाने परमां गतिमाप्नोत्यसंशयः ॥ १५ ॥ सूत उवाच ॥ एवं मनोर्वचः श्रुत्वा
यदुवाच दिवाकरः ॥ तदहं संप्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः ॥ १६ ॥ या सा दाक्षायणी देवी सती त्रैलोक्यपूजिता ॥ स्वका

आदि०
५०

याधिदेवेशः कपर्द्दी नीललोहितः ॥ तस्मै ते सुरापीत्वा सर्गं भाविष्णुना सह ॥ ३६ ॥ या भविष्यति कल्याणी तस्या गर्भसमुद्भ-
वः ॥ भविष्यति सुतस्तस्मान्न मृत्युरिष्टो न चापरः ॥ ३७ ॥ विश्वेश्वरमुमाकांतं शंकरं लोकशंकरं ॥ मुक्त्वा हरात्मजं देवं त्रैलोक्ये स
चराचरे ॥ ३८ ॥ न तं पश्यामि भो देवा स्तारकं यो वधिष्यति ॥ ब्रह्मणो वचनं श्रुत्वा सह साक्षाः शचीपतिः ॥ ३९ ॥ कथं भविष्य
ती सेव मालोक्य मनसा द्विजाः ॥ गुरुणा देवतैः सार्द्धं पुनराह सदेश्वराट् ॥ ४० ॥ रहस्येव सुतोत्पत्तौ त्वुपायश्चिंत्यतां सुराः ॥ इ
२५ त्युक्त्वा प्रययुर्देवाः शक्राद्या ब्रह्मणा सह ॥ ४१ ॥ मेरोरुत्तरतः शृंगे यत्रातिष्ठति माधवः ॥ गुप्तास्तिष्ठ समे यासा तारकाभ्दय
पीडितान् ॥ ४२ ॥ स ब्रह्मकान् सुरान् दृष्ट्वा हृष्टः प्रोवाच माधवः ॥ ४३ ॥ माधव उवाच ॥ उपायश्चिंत्यतां कोत्र वधार्थं तार
कस्य च ॥ अस्मिं चेदुच्यतां देवाः शंभोर्जायते यथा ॥ ४४ ॥ सूत उवाच ॥ एवं विष्णोर्वचः श्रुत्वा ब्रह्माद्याः सुरसत्तमाः
यथोक्तं ब्रह्मणा तेभ्यस्तथोक्तं विष्णवे सुरैः ॥ ४५ ॥ किमिदानीं तु कर्त्तव्यमिति संचिंत्य देवराट् ॥ सोस्मरन् मनसा कामं मजेयं न
ससुरासुरैः ॥ ४६ ॥ शक्रस्य चिंतितं ज्ञात्वा कामो रतिपतिः स्वयं ॥ शचीपतिं समागम्य प्राह पुष्पधनुर्द्धरः ॥ ४७ ॥ काम उवा
च ॥ किं कार्यं त्रिदशश्रेष्ठ किं कर्त्तव्यं मया प्रभो ॥ तीव्रेण तपसा कोपि स्थानमीहेत तत्ताचक्ष्व ॥ ४८ ॥ किंवा काचित् तव शंक
र्तुं न इच्छति या प्रभो ॥ कामिनी तां करोम्यद्य त्वद्ध्यानपरायणां ॥ ४९ ॥ न कश्चिदस्ति मे शूरो भयाद्यस्यास्ति शंकितः ॥ च
शयामि जगत्कृत्स्नं ब्रह्मादिस्तंबगोचरं ॥ ५० ॥ अथ किं बहुनोक्तेन दुर्वासाश्च महामुनिः ॥ यो सौ पिनाकी विश्वेश
स्तमपि व्यापयाम्यहं ॥ ५१ ॥ इंद्र उवाच ॥ जानाम्यहं रते भर्त्तुः सामर्थ्यं पुष्पधन्वनः ॥ नूनं हि सर्वकार्याणि त्वत्तः सि

स्था०२

दाक्षं शरीरं च बभूवाचलकन्यकां ॥१७॥ नाम्ना कालीति विख्याता विश्वरूपा महेश्वरी ॥ जगच्चैतन्यरूपा सा जगच्चैतन्यबोधिनी ॥
१८॥ अधिष्ठितस्तया काल्या हिमवान्पर्वतोत्तमः ॥ पुण्यवद्ध्यानमभूद्दिव्यामोक्षदः सर्वदेहिनां ॥१९॥ सिद्धानां चैव गंधर्वाणां दिवौकसां
॥ आवासः किंनराणां च स्मरणात्पुण्यदो नृणां ॥२०॥ शिवं भर्त्तारमिच्छंती तस्मिन्गिरिवरोत्तमे ॥ तपस्तेपे गुरुता काली शिवापि त्रै
रनुलया ॥२१॥ अथास्मिन्नंतरे दैत्यस्तारको लोककंटकः ॥ जातो दैत्यकुले वीरो महासुरूपो दिवौकसां ॥२२॥ ब्रह्माणं तपसाराध्य
वरं तस्माद्वाप्य च ॥ देवाः पलायितास्तेन तारकेन बलीयसा ॥२३॥ देवानां योषितो याश्च बलादपहृतास्तथा ॥ दुःखाग्निना सुसंत
प्ताः शक्राद्याः प्रथितौजसः ॥२४॥ गताः सशक्राः शरणं ब्रह्माणं त्रिदशेश्वरं ॥ आगतांश्च सुरान्दृष्ट्वा तत्र प्रोवाच पद्मजः ॥२५
ब्रह्मोवाच ॥ कस्मात्त्रस्ताः सुरा यूयमागता वै ममांतिकं ॥ ब्रूत तत्सकलं देवा उपायान्विदधिवः स्फुटं ॥२६॥ देवा ऊचुः ॥ तारका
स्य भयसंत्रस्ताः शरणं देवमागताः ॥ यथा स्म सोभयं देव तस्मान्न त्रातुमर्हसि ॥२७॥ अपिक्षणं सुरश्रेष्ठ नलभामो वयं सुखं ॥
त्रिंशद्वर्षसहस्त्राणि हरितारकयोस्तदा ॥२८॥ तथापि न जितस्तेन देवदेवेन चक्रिणा ॥ अवध्योस्मीति ज्ञात्वा य योस्त्का महो
दधिं ॥२९॥ वयमप्येवमेवं हि भीतास्त्वां शरणं विभोः ॥ आगतास्त्राहि नस्तस्मात्सुखदो भव पद्मज ॥३०॥ ब्रह्मोवाच ॥ शृणुध्व
ममराः सर्वे युष्माकं सुखदं महत् ॥ योसौ दैत्यस्तारकाख्यस्तेन तापपरमं तपः ॥३१॥ तस्य देहस्य तपसा दग्धमासीच्चराचरं ॥ दृ
ष्ट्वा तद्दुर्दशां नाथं गतोहं तारकांतिकं ॥३२॥ उक्तं मया वरं वत्स वरयेति महासुरः ॥ अब्रवीद्धे सुराजो मामभिवंद्य कृतांज
लिः ॥३३॥ तारक उवाच ॥ अवध्योहं सुरैः सर्वैर्विष्ण्वाद्यैः पद्मसंभव ॥ भवाम्यहं यथा देव तथा त्वं देहि मे वरं ॥३४॥ ए
वमस्त्विति संदृत्तस्मै वरं दत्वा सुरोत्तमाः ॥ अन्यच्चोक्तं हितार्थं च कस्माद्वध्योसि तं वद ॥३५॥ तारक उवाच ॥ यो यं देवाधिदे

कुनीनां०प०२

5

ध्यंतिनान्यथा॥५२॥गच्छ जेतुं महाभाग सुराणां हितकाम्यया॥चित्तं हरस्य संक्षोभ्य पार्वत्यासंगमं कुरु॥५३॥एतदेव हि
मे कार्यमेषएव मनोरथः॥एतस्मात्कारणात्वं हि स्मृतः पुष्पधनुर्धरः॥५४॥एवं शक्रवचः श्रुत्वा बलवान्मकरध्व
जः॥मधोः सखा रथी युक्तः पंचबाणो मनोभवः॥५५॥यत्रास्ते भगवान् शंभुर्ध्याने ध्यानसमाहितः॥निष्कंपः स्वास
नासीनश्चिंत्यमानो महेश्वरः॥५६॥आप्य शंभो रायतनं संपश्यन्मकरध्वजः॥शैलादिं द्वारदेशे तु मेरुशृंगमिवोदि
तं॥५७॥सर्वाभरणसंयुक्तं सहस्रादित्यवर्चसं॥शूलहस्तं त्रिनेत्रं च चंद्रार्धकृतभूषणं॥५८॥वज्र[illegible]पाणिं च
तु बर्हिर्द्वितीयमिव शंकरं॥तं दृष्ट्वा मदनो विप्राश्चिंताक्रांतस्तदाभवत्॥५९॥कथं प्रविश्य द्रक्ष्यामि शंभुं त्रि
दशार्चितं॥कथं कार्यं करिष्यामि सुराणां प्रीतिवर्द्धनं॥६०॥चिंतयित्वा तु बहुधा वंचनार्थाय नंदिनः॥वायु
रूपं ततः कृत्वा सुगंधं मृदुशीतलं॥६१॥प्रविवेश तदा कामो दक्षिणां दिशमाश्रयः॥तेन याम्यां दिशि गतो वायु
र्वाति सुखावहः॥६२॥अथापि कारणात्सोयं सुगंधो मृदुशीतलः॥अपश्यत्तत्र मदनः सूर्यकोटिमिवोदितं॥६३॥
सहस्रनयनं देवं सहस्रतनुमीश्वरं॥नीलकंठं सुधाभासं शुभ्रखंडेंदुधारिणं॥६४॥जगदुत्पत्तिसंहारास्थिस
नुग्रहकारणं॥शुभ्रस्फटिकसंकाशं विधूममिव पावकं॥६५॥मुंडमालाचितं देवं सूर्यमालाविभूषितं॥अनौपम्यम
साहश्यम[illegible]प्रमेयमनाकुलं॥६६॥जगच्चक्षुर्जगद्बाहुं जगच्छीर्षं जगन्मयं॥जगत्पादं जगच्छ्रोत्रं स्थूलं सूक्ष्मं परात्प
रं॥६७॥रुद्रं शर्वं पशुपतिमुग्रं भीमं भवं द्विजाः॥महादेवं महेशानमष्टमूर्तिं जगत्पतिं॥६८॥व्यक्ताव्यक्तं त्रिलो

आदि०
५०

केशं पूजितं-वसुरासुरैः॥ अथ दृष्ट्वा महादेवं प्रहृष्टो मकरध्वजः॥६९॥ निष्कम्प्य चापमापूर्य स्थितः पश्यन्भवोद्भ
वं॥ एवं स्थितस्य कामस्य सहस्राण्ययुतानि षट्॥७०॥ गतानि तस्य वर्षाणि मुनिं द्राक्षिन्तो जन्मनः॥ ततः स भगवा
न् देवो नेत्रे उन्मील्य शंकरः॥७१॥ अपश्यद्गिरिजां देवीमग्रे विश्वेश्वरः शिवः॥७२॥ गिरिंद्रपुत्रीं तपसः प्रस
न्नां लज्जाविन्चितां पुष्पशरांतकारी॥ दृष्ट्वा किमन्त्रेति विकल्पबुद्ध्या कामो यमन्नेति निर्चिंस शान्त्या॥७३॥ द्धा
त्वा विलोक्याग्र विकृष्ट-चापं नेत्राग्निना सो मदनो विदग्धः॥७४॥ इत्यादि सपुराणे पं-चाशत्तमोऽध्यायः॥५०॥॥
सूत उवा-च॥ दग्धे रतिपतौ शम्भुरुवा-चा-चलकन्यकां॥ किमहं तव देवेशि करोमि मनसि स्थितं॥१॥ वरं ब्रूहि महादे
वि दास्याम्यद्य सुरेश्वरि॥ मयि प्रसन्ने देवेशि किं दुर्लभमिहास्ति ते॥२॥ श्रीदेव्युवा-च॥ हतो तु कामे वरद नीलकंठ वरेण
किं देव करोमि तेन॥ विनैव कामेन न-चास्ति भावः स्त्रीपुंसयो भास्करकोटिकल्पः॥३॥ भावस्य हानेः सुखसन्निक
र्षः कथं भवेद्ब्रूहि सुरेश चैव॥ उवा-च भूयो मदनांतकारी देहेन-चाहं मदनं सुनेत्रे॥४॥ नेत्रस्य वैतज्ज्वलनात्सकस्य
स्वरूपमेतद्दहे किं करोमि॥५॥ श्रीदेव्युवा-च॥ बालेति मत्वा भवभूतनाथ व्यामोहसे किं त्वमनिंद्यवर्य॥ स्वतंत्र
वृत्तिर्यदि वात्तवैषा तदेहिमपि-वाप्रसंस्तं॥६॥ यदि विश्वेश्वरो देवो ब्रह्मादीनां हरः शिवः॥ प्रतारणे प्रवृत्तश्चेत्को निवा
रयितुं क्षमः॥७॥ नाहं प्रतार्याभगवान्त्वामहं शरणागता॥ गतिर्नान्यास्ति मे देव तस्मान्मां त्रातुमर्हसि॥८॥ त्वमेव चक्षु
र्जगतस्त्वमेव च-वसांपतिः॥ त्वमेव धाता जगतो विधाता विश्वतोमुखः॥९॥ नमाम्यहं देववरं पुराणमुपेंद्रवेधामरराजजु

मा३

३
७२

त्रि१

ष्ठं॥शशांकसूर्याग्निमयत्रिनेत्रंध्यानाधिगम्यंजगतःप्रकाशं॥१०॥त्वांचाव्ययाधारमनंतवीर्यंज्ञानार्णवंचैवगुणार्णवंच॥
परात्परंधामनिधिंसुसूक्ष्ममनामयंध्यानविहीनरूपं॥११॥हिरण्यगर्भंजगतःप्रसूतिंनमामिदेवंहरिणांकचिन्हं॥पि
४३ नाकपाशांकुशशूलहस्तंकपर्दिनंमेघसहस्रघोषं॥१२॥तमालकंठंस्फटिकावदातंनमामिशंभुंभुवनैकसिंहं॥य
दक्षरंनिर्गुणमप्रमेयंयज्ज्योतिरेकंप्रवदंतिसंतः॥१३॥दूरंगमंदेवमनंतमूर्तिंनमामिसूक्ष्मंपरमंपवित्रं॥नमामिरुद्रं
५५ प्रमथाधिनाथंकुमासनस्थंप्रकृतिद्वयस्थं॥१४॥तेजोनिधिंबालशशांकमौलिंकालेंधनंवन्हिरवींदुनेत्रं॥१५॥सुर
सिंधुचर्चितशीर्षंशार्दूलचर्मससायकंचाजितं॥नरसिंहदारुणंत्वांनमामिशरभरूपधरं॥१६॥उरगेंद्रराजहारंच
लद्दलयभूषणंहरंचवरदं॥विबुधमुकुटार्चितांघ्रिंनमामिहरिचर्मवसनंत्वां॥१७॥सूतउवाच॥एवंस्तुतस्त
यादेव्याप्रपन्नार्तिहरोहरः॥प्रसन्नोथाब्रवीद्देवींकालींत्रिपुरहाहरः॥१८॥श्रीशिवउवाच॥वरयस्ववरंदेवियद
भिमतंचसुव्रते॥श्रीदेव्युवाच॥जीवत्वयंमहादेवकामोलोकप्रतापनः॥विनाकामेनहिकथंयाचेहंभगवन्व
रं॥१९॥ईश्वरउवाच॥भवत्वनंगोमदनःप्रसपार्थसुलोचने॥तेनरूपेणलोकस्यशोभनायभवत्वलं॥२०॥इ
इति श्रुतितेनान्वितोवायदिवाप्रमेयस्त्वनंगरूपोमकरध्वजोसौ॥हरस्यचाप्यद्भुमयेरितस्यस्वापबाणःस्मरतिर्बभूव॥
२१॥शिवामहेशानोवरंदत्वाहरःस्वयं॥स्मरस्यपंचबाणस्यतत्रैवांतरधीयत॥२२॥यःपठेदेनमध्यायंभक्त्यादेव
स्यसन्निधौ॥सर्वपापविनिर्मुक्तोब्रह्मलोकेमहीयते॥२३॥इत्यादिसपुराणेएकपंचाशत्तमोध्यायः॥५१॥ ७॥

आदि०
५२

सूत उवाच ॥ शंकरांच्च वरं लब्ध्वा देवी त्रैलोक्यपूजिता ॥ उमा भगवती काली संप्राप्ता पितृमंदिरं ॥१॥ अपश्यद्गिरि
राजस्तां चंद्रकोटीनिभाननां ॥ दीपयंती जगत्सर्वं विद्युत्पुंजसमप्रभां ॥२॥ अंके काली समाधाय शिरस्याघ्राय चद्विजाः
उवाच परयाप्रीत्या विश्वेश्री पर्वतेश्वरः ॥३॥ हिमवानुवाच ॥ तपसा तोषितः शंभुरमेयात्मा सनातनः ॥ कीदृशश्च व
रो लब्धस्त्वया देवान्महेश्वरात् ॥४॥ श्रीदेव्युवाच ॥ तपसाराध्य विश्वेशं गोपतिं शूलपाणिनं ॥ तमेव शंपतिं लब्ध्वा
कृतार्थास्मीति मे वरः ॥५॥ भेदो स्तित्वत्तो राजन्नन्न मे देवान्महेश्वरात् ॥ सिद्धमेवावयोरैक्यं वेदांतार्थविचारणात्
॥६॥ यदेतदैश्वरं तेजस्तन्मां विद्धि गिरीश्वर ॥ सर्वभूतात्मकं शांतं विश्वं यत्र प्रतिष्ठितं ॥७॥ अहं सर्वांतरा शक्तिर्मा
यामायी महेश्वरः ॥ अहमेका परा शक्तिरेक एव महेश्वरः ॥८॥ नावयोर्विद्यते राजन् भेदो वै परमार्थतः ॥ एकाहं स
र्वगानंता विश्वरूपा सनातनी ॥९॥ पिनाकपाणेर्दयिता नित्यं गिरिवरोत्तम ॥ ज्ञातुं न शक्ता ब्रह्माद्या मत्स्वरूपं हितत्त्व
तः ॥१०॥ इच्छाशक्तिरहं राजन् ज्ञानशक्तिरहं पुनः ॥ क्रियाशक्तिः प्राणशक्तिः शक्तिमान् भगनेत्रहा ॥११॥ कूटस्थ
मचलं सूक्ष्मं सत्यं निर्गुणमव्ययं ॥ आनंदमक्षरं ब्रह्म तत्तान जानीहि मत्परं ॥१२॥ तत्पदं ते प्रपश्यंति येषां भक्तिर्मयि स्थि
रा ॥ नान्यथा कर्मकांडैश्च तपोभिश्चातिदुष्करैः ॥१३॥ शिवस्य परमा शक्तिर्नित्यानंदमयी ह्यहं ॥ ब्रह्मणो वचनाद्रा
जन्न भवं दक्षकन्यका ॥१४॥ शूलिनो देवदेवस्य निंदकं परमेष्ठिनः ॥ विनिंद्य पितरं दक्षं जातास्मि तव कन्यका ॥१५॥ स्वे
च्छयैवावतारो मे नैव चान्यवशात्मिता ॥ तस्मान्मां परमां शक्तिमिति ज्ञात्वा सुखीभव ॥१६॥ नाशयामि तवाज्ञानं भव
बंधनकारणं ॥ दिव्यं ददामि ते ज्ञानं दुःखत्रयविनाशनं ॥१७॥ एवं देव्याः प्रसादेन हिमवान्पर्वतेश्वरः ॥ लब्ध्वा माहेश्व

४

दं ज्ञानं जीवन्मुक्तस्तदा भवेत् ॥१८॥ अपश्यदखिलं विश्वमुमामाहेश्वरात्मकं ॥ निरानंदं निर्विभागमात्मानं चतदात्म
कं ॥१९॥ मानमेयादिरहितं भेदाभेदविवर्जितं ॥ बाह्याभ्यंतरविनिर्मुक्तं शुद्धं निर्गुणमव्ययं ॥२०॥ न समीपं न दूरस्थं ६२
न स्थूलं नापि वा कृशं ॥ न दीर्घं नापि वा ह्रस्वं न पीतं नापि लोहितं ॥२१॥ न नीलं न च रक्तं हरं च न शुक्लं नापि कर्बुरं ॥ पा
णिपादविनिर्मुक्तं न श्रोत्रं न च चाक्षुषं ॥२२॥ अनासिकमजिह्वं च मनोबुद्धिविवर्जितं ॥ बंधमोक्षविनिर्मुक्तं बो
धाबोधविवर्जितं ॥२३॥ नाधारस्थं न नाभिस्थं न हृदिस्थं न कंठगं ॥ नापि नासाग्रगं विज्ञानभ्रूमध्यगतं हि तत् ॥२४
न नाडीत्रयमध्यस्थं द्वादशांतगतं न च ॥ नोर्णातंतुनिभं तद्धि विद्युत्पुंजनिभं न च ॥२५॥ सर्वोपाधिविनिर्मुक्तं
६७ चैतन्यं सर्वगं शिवं ॥ तदेवेदमिदं विश्वं तस्मादन्यन्न विद्यते ॥२६॥ आस्थाय परमां भक्तिं शिवयोः पादपंकजे ॥
पित्रोर्हिरण्यगर्भस्य ज्ञाग्निणाश्चापि सुव्रताः ॥२७॥ इ सादिसपुराणे द्विपंचाशत्तमोध्यायः ॥५२॥ ॥ सूत
उवाच ॥ आह्वानयन्नतो विश्वकर्माणं परमेश्वरः ॥ विवाहमंडपं कर्तुं नानैश्वर्यविभूषितं ॥१॥ ते नाहूतस्ततः
शीघ्रं विश्वकर्मा महामतिः ॥ प्रयतो हिमवत्पार्श्वं कुशलो विश्वकर्मणि ॥२॥ दृष्ट्वाथ विश्वकर्माणं हृष्टः पर्वत
राट् स्वयं ॥ स्वागतासनपाद्याद्यैः सादरस्तमपूजयत् ॥३॥ विधिवत्पूजयित्वा तु विश्वकर्माणमब्रवीत् ॥ विश्वक
र्मन्महाप्राज्ञ सर्वशास्त्रविशारद ॥४॥ यत्कारणादिहाहूतो मया त्वं तद्ब्रवीम्यहं ॥ विश्वेश्वरो महादेवो भगवा
न्नीललोहितः ॥५॥ आगमिष्यति विश्वेशो परिणेतुं शिवः स्वयं ॥ मंडपस्तत्र कर्तव्यो यज्ञार्थं तद्धिरण्मयः ॥६॥

योजनायुतविस्तीर्णमनेकैश्वर्यसंयुतं॥ दृष्टमात्रेण शर्वस्य प्रीतिर्भवति येयथा॥७॥ तथा त्वं मंडपं शीघ्रं कुरु विश्वेश्वराप्रियं ॥ एवमुक्तस्तदा तेन गिरीशेन विश्वकर्मकृत॥८॥ चिंतामहं मंडपं शीघ्रमसृजद्रत्नविग्रहं॥ स्तंभैर्हैममयैश्चित्रैर्मणिभिः सूर्यसंनिभैः॥९॥ इंद्रनीलमयैर्दिव्यैर्वैडूर्यैर्विद्रुमैरपि॥ मौक्तिकैर्वज्रनीलैश्च चंद्रकांतिमयैरपि॥१०॥ स्फटिकैर्विद्रुमैश्चापि मुक्तारामावलंबितैः॥ चामरालंकृतैः कक्षैर्दर्पणैर्विविधैरपि॥११॥ सूर्यबिंबप्रतीकाशैश्चंद्रबिंबसमप्रभैः॥१२॥ ध्वजमालाकुलैर्दिव्यैः पताकानेकशोभितं॥ रत्नजैः सिंहशार्दूलैर्गजैर्व्यालैर्निरंतरं॥१३॥ रचितं मंडपं दिव्यं प्रियं त्रिपुरविद्विषः॥ रुद्राणां च तथा रूपैर्गंधर्वाप्सरसां तथा॥१४॥ देवैश्चैव मनोहार्यैर्मत्स्यजैश्च तथापरैः॥ मालाभिस्तबकैर्विचित्रै रत्नजैः कुशुंभैर्भृशं॥१५॥ क्वचिच्छ्यामीकरीसोधहर्म्यां भूमिं विनिर्ममे॥ क्वचिद्धूमकसंकाशां दीप्तां विद्रुमसंनिभां॥१६॥ क्वचित्सन्दलाकारामिंद्रायुधसमप्रभां॥ क्वचिन्नीलोत्पलाभासां नीलजीमूतसुप्रभां॥ अनेकाकारविन्यासैस्ततो धात्रीं विनिर्ममे॥ मनसैव यथा ब्रह्मा विश्वमेतद्विनिर्ममे॥१८॥ क्वचित्कलशविन्यासैः क्वचित्स्वस्तिकभूषितैः॥ हरिचंदनधाद्यैः कर्पूरोद्गारगंधिभिः॥१९॥ जातीपाटलपद्मानां चंपकानां सुगंधिभिः॥ आसनैर्विविधैः पूतैश्चंद्रजीमूतसंनिभैः॥२०॥ उदयार्कसमाकारैर्मेरुशृंगोपमैर्भृशं॥ तमालचंपकाभैश्च इंद्रनीलमयैस्तथा॥२१॥ सिंदूरवर्णसं(र्णैः)॥ ओर्जपाकुसुमसंनिभैः॥ संध्यारागनिभैश्चान्यैर्दाडिमीकुसुमप्रभैः॥ हेमकुंभनिभैश्चान्यैर्मुक्ताफलनिभैरपि॥ तारकापूगसंकाशैः पद्मनीलेंद्रनीलजैः॥२३॥ तत्रैव मंडपे दिव्ये तोयस्थानान्यकल्पयत्॥ दीर्घिकास्तोय

५

पूर्णास्तुक्षीरपूर्णास्तथैवच॥२४॥दधिस्रुहान्यनेकानिसुधासंपूरितानिच॥घृतपूर्णस्रुहानचरत्नसोपानमंडि
ताः॥२५॥वृक्षांश्चकामिकान्दिव्यान्दीर्घिकानांतटोभयोः॥असंजक्रीडनार्थायसदापुष्पफलान्वितान्॥२६॥
भक्ष्यैर्नानाविधैर्दिव्यैःफलितान्मुनिपुंगवाः॥कदलीखंडमध्येतुतमालगहनेष्वपि॥२७॥क्रीडावाप्यःसुशोभाढ्या
स्तथैवाशोकसंकुलाः॥दीर्घिकानांतटेरम्येतरुणाःस्निग्धशाखिनः॥२८॥दोलाश्चबंधयामाससमुक्ताहामभिरू
ज्वलैः॥रमणीयानिदिव्यानिमनस्तुष्टिकराणिच॥२९॥उद्यानवनखंडानिस्थानेस्थानेव्यकल्पयत्॥त्रैलो
क्यतिलकेतस्मिन्नहेमपीठस्यमध्यगे॥३०॥सिंहैश्चविधृतांश्वेतैःसहस्रदलमंडितां॥पारिजातद्रुमाणांचमंज स८
रीभिरलंकृतां॥३१॥इंद्रनीलमयींवेदींचारुसोपानमंडितां॥शतयोजनविस्तीर्णांस्तंभैश्चकलशान्वितां॥३२॥क
न्यानेकाप्सरश्चैवरत्नजादिव्यरूपिणी॥पीनोरुजघनास्ताश्चपीनोन्नतपयोधराः॥३३॥चामराग्रकरास्तास्तुहा
राबलिविराजिताः॥वीणावेणुकराश्चान्याःकांचीगुणविराजिताः॥३४॥चंचलायतनेत्राश्चतिलकालकमं
डिताः॥मध्यक्षामाश्चबिंबोष्ठीःकमलोत्पलमालिकां॥३५॥अनेकाकारविन्यासैर्निर्ममेताःपृथक्पृथक्॥३६
भि३ एवंहिदिव्यैःसुरसुंदरीर्नानाप्रयोगैर्विविधैश्चचित्रैः॥मनोभिरामैर्नयनाभिरामैर्युक्तांतुवेदींत्वरितश्चका
र॥३७॥इत्यादिसपुराणेत्रिपंचाशत्तमोध्यायः॥५३॥ ॥सूतउवाच॥मंडपंनिर्मितंश्रुत्वाशंकरोविश्वकर्मणा
॥शैलादिमब्रवीद्देवोविश्वेशोविश्वपूजितः॥१॥श्रीभगवानुवाच॥हितार्थंसर्वदेवानामस्माकंचविशेषतः॥

आदि०
५८
निर्मितं३

विवाहयज्ञ आरब्धो नगराजेन धीमता ॥ २ ॥ दानार्थमद्रिकन्यायाः प्रस्थितो हिमवान्स्वयं ॥ अहं तत्र गमिष्यामि सुरै
र्ब्रह्मादिभिः सह ॥ ३ ॥ त्वमिहावाहय सुरान् कालाग्न्यादीन् द्विजोत्तमाः ॥ द्वीपांश्च सागरांश्चैव पर्वतांश्च नदीस्तथा ॥ ४
मंडपं यत्र शोभनं विश्वकर्मणा ॥ तत्र तिष्ठ स्वमादेवी मम ध्यानपरायणा ॥ ५ ॥ विद्युल्लतेव भासंती चंद्रकोटिनिभानना ॥
एवमुक्तो महेशेन नंदी सूर्यायुतप्रभः ॥ ६ ॥ नत्वा विश्वेश्वरं शंभुं ध्यानारूढस्तदाभवत् ॥ ध्यानतः क्षणात्समायातः का
लाग्निर्विश्वदाहकः ॥ ७ ॥ रुद्रैः परिवृतो देवः कोटिकोटिगुणेश्वरैः ॥ ततोऽब्रवीत्स कालाग्निः सर्वज्ञं नंदिकेश्वरं ॥ ८ ॥
किमर्थमहमाहूतो देवदेवेन शंभुना ॥ उपस्थितो वा प्रलयः संहरिष्यामि तत्क्षणात् ॥ ९ ॥ एवमुक्तस्तदा तेन शैला
दिस्तं यथाब्रवीत् ॥ प्रलयार्थं न चाहूतस्त्वं विश्वेशेन शंभुना ॥ १० ॥ ग्रहिष्यति गिरेः पुत्रीं पत्नीत्वेन महेश्वरः ॥ त
दर्थं त्वमिहाहूतो ब्रह्माद्याश्चापि चौकसः ॥ ११ ॥ नंदिनो वचनं श्रुत्वा कालाग्निरिदमब्रवीत् ॥ विष्णुकामाचयं सर्वे ६
धा ब्रह्माद्याश्चागता इति ॥ १२ ॥ सर्वे ते ध्याननिरतास्ते सर्वे दर्शनोत्सुकाः ॥ कालाग्निप्रमुखानां वचनं श्रुत्वा गणाग्रणीः
॥ १३ ॥ आह विश्वेश्वरं देवं स्निग्धगंभीरया गिरा ॥ १४ ॥ नंदिकेश्वर उवाच ॥ ब्रह्माद्याश्चागताः सर्वे शूलपाणे तव
पं वाज्ञया ॥ द्रष्टुमिच्छंति ते सर्वे त्वामनंत तनुं हरं ॥ १५ ॥ दिशादेशं पुरारे मां किंच क्ष्यामि सुरासुरान् ॥ चारितो द्वारमूले
तु दृष्टुकामाश्च संस्थिताः ॥ १६ ॥ यत्तेनि रूपमंरूपं तेजोमयमिनिंदितं ॥ यदधो भागमाश्रित्य रुद्रकालाग्निसंज्ञितं ८
॥ १७ ॥ तं चैव पश्य भूतेशं शूलहस्तं सदोज्वलं ॥ ततो विवेश कालाग्निर्विष्णुर्ब्रह्मा शतक्रतुः ॥ १८ ॥ अन्ये च देवा गं

धर्यान्ऋषयोमनवस्तथा॥ सर्वेकोलाहलंकृत्वादेवासुरमहोरगाः॥१९॥ विविशुर्हरसंस्थानंनगाद्याद्रचसागरं॥
प्रविश्यभवनेरम्येनानाधातुविचित्रिते॥२०॥ गणकोटिसमाकीर्णेरुद्रकोटिसुसेविते॥ अग्रजन्मागुरुः पूर्वंरुद्रे
देवैर्वृतस्तदा॥२१॥ भवारिमंधकारिंतमपश्यद्गंतकानलः॥ मुक्ताचलप्रतीकाशंशशांकचयसंन्निभं॥२२॥ नी
लकंठंत्रिनेत्रंचशूलिनंसर्वतोमुखं॥ सूर्यकोटिप्रतीकाशंजगदानंदकारणं॥ कपालमालिनंदेवंकपर्द्दकृतभूषणं
॥२३॥ दशबाहुंदशार्द्धास्यमनंतंतेजसांन्निधिं॥ जगदुत्पत्तिसंहारस्थित्यनुग्रहकारणं॥२४॥ अप्रमेयमनाकार
मप्रपंचमनाकुलं॥ सिंहासनस्थमचलंचराचरविभूतिदं॥२५॥ क्षारोदमिवनिष्कंपंत्रैलोक्यप्रभवंशिवं॥ स
र्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं॥२६॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यसंस्थितं॥ सुरासुरैर्ध्यमा
ध्यायमानं ५ नंमुमुक्षुभिः॥२७॥ इदंरूपंसमालक्ष्यदेवदेवस्यशूलिनः॥ अग्रस्थितःसकालाग्निर्मेरोर्मेकरिवापरः॥२८
स० अधोवाच्चश्रीलादिः प्रणिपत्यसनातनं॥ नरकाणामधोभागेपुरंयत्रप्रतिष्ठितं॥२९॥ योजनायुतविस्ती
र्णंकामदंशुभलक्षणं॥ यस्यचोर्ध्वंविशालंबंशतयोजनमानतः॥३०॥ ज्वालामालाकुलंदिव्यंसर्वलो
कभयंकरं॥ प्राकाराट्टालकैर्युक्तंगोपुरैस्तोरणान्वितं॥३१॥ रक्तनीलसमानाभैर्भद्दिमघोषैर्दुरासहैः॥
धूलोरुद्रसहस्रैस्तुसिंहरूपैर्महाबलैः॥३२॥ नियम्यचस्वकंतेजःश्रीमर्थंतेधुनागतः॥ ध्यातचामीक

आदि० ५८

राभासर्व्वे नागरूगंधयुक् ॥३३॥ नीलकंठस्त्रिनेत्रश्च वृषकेतुर्महाबला ॥ द्वीपिचर्मपरीधानः पंचवक्त्रो दु
भूषणः ॥३४॥ अनंतमेखलाधारी कुंडलीकृततक्षकः ॥ दशबाहुर्महातेजाः पीनवक्षा महाभुजः ॥३५॥ प्र
लयोदधिनिर्घोषो रक्तनीलमहातनुः ॥ आगतः सौम्यरूपेण तत्र देवसमीपतः ॥३६॥ परैयन्नमदुभावेन दे
वदेवजगत्पतेः ॥ एते चैव महावीर्याः कालाग्नेश्च समीपतः ॥३७॥ तिष्ठंति स्वकलाभासा रुद्राश्च शतकोटयः
॥ खन्नियोगान्महादेव कालाग्न्यादेशकारिणः ॥३८॥ तिष्ठंति स्वपुरे रम्ये क्रीडमाना मनोरमे ॥ तत्रानुज्ञागता ले
तेशशांकमौलीनो मला ॥३९॥ शुध्धः स्फटिकसंकाशाः पद्मरागसमप्रभाः ॥ तडिभ्रमरसंकाशा वज्रशूलधनु
र्धराः ॥४०॥ नीलकंठास्त्रिनेत्राश्च शार्दूलचर्मवाससः ॥ सर्वाभरणसंपन्ना अनंतबलविक्रमाः ॥४१॥ जराक
कृशोकसंसक्ताः सुखदुःखविवर्जिताः ॥ दृष्ट्वानपि महादेव पश्य प्रीतिकरो भव ॥४२॥ हरिश्चंद्रनलिङ्गागान
शोकककमलार्चितान् ॥ देशाधिपत यश्चैते प्रह्लादाद्या महाबलाः ॥४३॥ समागता महादेव नागाः शेषादयः शि
वः ॥ सर्वाः पातालवासिन्यो रूपयौवनगर्विताः ॥४४॥ आगता देवदेवेश हाटकेश्वरकन्यकाः ॥ एते पर्वतरा
जानः कैलासाद्या महाबलाः ॥४५॥ आगता देवदेवेश द्वीपैश्च सह सागराः ॥ गंधर्वाः किंनरा यक्षाः सिद्धविद्या
अ२ धराः शिवाः ॥४६॥ उर्वश्याद्याप्सरसो नद्यः पापहराः शुभाः ॥ एते च मुनयो देवभृग्वाद्याः प्रथितौजसः ॥४७
संप्राप्ता निपुणानीह शंकरीं नाम हासनं ॥ एते लोकाः समायाताः ससीताः सप्तशंकरः ॥४८॥ मूर्त्तयस्तवरे

७

वेशा मथा याश्च समागताः॥ आदित्याश्च सचो रुद्राः साध्याश्चैव मरुद्गणाः॥४९॥ सनत्काद्या महात्मानः सत्यलोक
निवासिनः॥ पद्मरागनिभो देवो बंधूककुसुमद्युतिः॥५०॥ जटाभिस्तु शिरोन्नद्धो रत्नमालाविभूषितः॥ कमंडलु
धरः श्रीमान् दंडहस्तः सुलोचनः॥५१॥ कृष्णाजिनोत्तरीयेण रक्तमाल्यांबरेण च॥ सुवर्णमेखलाधारी रुक्मकुंड
लमंडली॥५२॥ हंसध्वजश्चतुर्बाहुः सुरासुरनमस्कृतः॥ सवित्र्या सहितो देवः पद्मयोनिरिहागतः॥५३॥
अतसीपुष्पसंकाशस्तमोदलनवर्चसः॥ पीतांबरधरः श्रीमान् पीतगंधानुलेपनः॥५४॥ शंखचक्रगदाधा
री शार्ङ्गी च तार्क्ष्यवाहनः॥ किरीटी कुंडली हारी कौस्तुभेन विराजितः॥५५॥ चामीकरसुमालाभिर्दीप्यमानो
विराजते॥ सूर्यायुतप्रतीकाशो नीलो सलदलेक्षणः॥५६॥ क्षीरोदार्णवशायी च नीलजीमूतनिःस्वनः॥ मे
रमामर्दितसर्वांगः शेषपर्यंकलालसः॥५७॥ गुरूणां च गुरुर्देवईश्वराणामपीश्वरः॥ वरदो भक्त्या लभ्यो
दैसकोटिक्षयंकरः॥५८॥ आगतोयं महादेव विष्णुः प्रियतरस्तव॥ तप्तचामीकरप्रख्यो वज्रहस्तो महाबलः
॥५९॥ पट्टांशुकपरीधानो हेममालाविभूषितः॥६०॥ प्रख्यातवीर्यो बलवृत्रहंता बालार्कभासो हरिचंदनांकः
॥ पुन्नागनागैर्बकुलैस्तु जुष्टो मुक्ताफलालंकृतकंठदेशः॥६१॥ अयं समागतः शक्रो वह्निर्वैवस्वतस्त
था॥ निर्ऋतिर्वरुणो वायुः कुबेरश्च समागताः॥६२॥ ईशानश्च महाभागस्त्रिंशत्कोटिगणैर्वृतः॥ आगतस्त्रिज
गद्योनेः पिनाकी च गुणेश्वरः॥६३॥ दशकोटिगणैर्युक्तः कालकंठस्तथैव च॥ सप्तकोटिगणैर्युक्तो घंटाकर्णो

आदि०
५८

महाबलः॥६४॥दशकोटिगणैर्युक्तः सुघोषश्च महाबलः॥ चतुःकोटिगणैर्दंडी त्रिंशच्चंडी दशकोटिभिः॥६५॥षड्भिर्म
यूरवदनः सिंहास्यो दशकोटिभिः॥षड्भिश्च मुंडमाली च त्रिशूली पंच कोटिभिः॥६६॥अष्टभिर्विश्वमाली च त्रि
मूर्तिर्नवकोटिभिः॥एते गणेश्वराः सर्वे तथा चान्ये गणेश्वराः॥६७॥एषां संख्यां न जानंति ब्रह्माद्या देवतागणाः
॥आगता नाम महादेव श्रुणु कोलाहलं विभो॥६८॥अमरेशप्रभासश्च पुष्करो नैमिषस्तथा॥आषाढी दंडमुं
डी च भारभूतिश्च लकुली॥६९॥तीर्थाधिपतयो देवा आगता दिव्यमूर्तयः॥एते गुह्याष्टकाद्याः कामरू
पा महाबलाः॥७०॥तथा ह्यागता रुद्रा ब्रह्मांडांतरवासिनः॥कोटिकोटिगणैर्युक्ता देवदेव महेश्वर॥७१॥
विश्वेश्वर जटोद्भूता सिंधुश्चैव सरस्वती॥यमुना गंडकी भागा विपाशा नर्मदा शिवा॥७२॥कृष्णा घंटा च निर्वि
ध्या देविका च चषद्वरा॥शतद्रुश्च पयोष्णी च चंद्रभागा च गोमती॥७३॥चर्मण्वती च कावेरी शरयूश्च प
रावती॥धूतपापा च सारथ्या मणिमाला सुधिका॥७४॥० जंबूता पीयनंश्रूरा कौशिकी कुमुदाकरा॥मंदाकि
नी चंद्रलेखा चंपका मोदवाहिनी॥७५॥शरावती कामवेगा श्वेतला कामचारिणी॥पूर्णा मद्रा महामोदा गं
भीरा चार्त्तिनीस्रत्ता॥७६॥मेघघोषा मेघवर्णा सदानीरा च नंदिनी॥वेदाचेस्वती चैणा श्रोता चित्रोत्पला त
था॥७७॥वेत्रवती च चक्षुर्धी पिप्पला जंजला तथा॥स्वरजा कुमुदा शिक्षा कौशिकी निषधा सिता॥७८॥वै
तरिणी सिनीवाली वेगवती पुनः पुना॥गौरी कृष्णा तथा दुर्गा तुंगभद्रा सत्यवती॥७९॥स्वर्णाभी मरथी शुभ्रा

८

(18)

रत्नमालातरंगिणी॥एतादेव्यमहानद्यः पावनाः कल्मषापहाः॥८०॥मूर्त्तिमंत्यस्तत्र वै स्नानं उत्सवे त्विह आगताः
॥सर्वा एता महादेव पश्य कारुण्यवारिधे॥८१॥भवंति कृतिनः सर्वे त्वयि दृष्टे महेश्वरे॥एवमुक्त्वा तदा नंदी देवदे
वस्य चाग्रतः॥८२॥पपात दंडवद्भूमौ भक्त्या परमया द्विजाः॥नंदिनं तं महात्मानं दृष्ट्वा विश्वेश्वरः प्रभुः॥८३॥
प्रीतो भूत्वाह का मारिमंदरे चारुकंदरे॥इमं यः पठते नित्यं शृणुयाद्वापि भक्तितः॥प्रीतास्युर्देवताः सर्वास्त-
स्याभिष्टफलप्रदाः॥८४॥इत्यादित्यपुराणे चतुःपंचाशत्तमोध्यायः॥५४॥ ॥सूत उवाच॥अथासौ हिम
वान्विप्रा देवीमासस्तुतां मुदा॥प्रदानार्थं महेशाय संप्राप्तो मंदरं क्षणात्॥१॥सहितो मुनिभिर्दिव्यैर्भक्त्या न मुनिस
त्तमाः॥आरुह्य दृष्ट्वा गिरिं नंदीदेवदेवं पिनाकिनं॥२॥वक्तुकामः समायातो भगवान्पर्वतेश्वरः॥श्रुत्वा तु वचनं श्ल
क्ष्णं च्युतं नंदीमुखात्तदा॥३॥मेघगंभीरया वाचा महादेवो ब्रवीदिदं॥वद त्वयं गिरिश्रेष्ठो हृदये यत्प्रतिष्ठितं॥४
काम स्तदा चिराद्दस्य भाविष्यति न संशयः॥एवमुक्तस्तदा विप्रा देवदेवेन शंभुना॥५॥तदा च गिरिशार्दूलो भूत्वा
ग्रे चनतांजलिः॥हिमवानुवाच॥यासीत्पूर्वं च ते पत्नी सा च तत्तीर्णा गृहे मम॥तामेव तव हानार्थमागतोस्मि महेश्व
र॥६॥अमी ब्रह्मादयो देवास्तव समीपमिहागताः॥किं गोत्रमिति पृच्छामि सेषामग्रे विभो वद॥७॥श्रुत्वा तु भारती
तस्य विश्वेशो विश्वपूजितः॥किं गोत्रमिति संचिंत्य सनोत्तरं प्रससर्ज ह॥८॥दृष्ट्वा निरुत्तरं शंभुं जहसुर्देवदानवाः॥ए
षएव जगद्योनिर्गोत्रमस्य कथं भवेत्॥९॥इत्यूचुर्विबुधाः सर्वे हिमवंतं नगेश्वरं॥देवानां वचनं च श्रुत्वा गिरिराजो

आदि०
५५

ब्रवीदिदं ॥१०॥ विश्वेश्वरं परं धाम परमात्मानमव्ययं ॥ शाश्वतं गिरिशं स्थाणुं विश्वाकारं सनातनं ॥११॥ स्नात्वा स्नात्वा पुन
र्दत्वा उमा सर्वं तत्र च प्रभो ॥१२॥ ततो महोत्सवो विप्रा जयशब्दादिमंगलैः ॥१२॥ दुंदुभीनां च वाद्यानाम भवत्सागरोप
मः ॥१३॥ गृहीत्वेति शिवः प्राह पार्वतीपर्वतेश्वरं ॥ अवदद्भगवान् शंभुरंगुलीयं प्रवेशय ॥१४॥ इमं च कलशं
चैव आदाय त्वं नगोत्तम ॥ पाहि गत्वा अनेनैव तास्तु मां स्नापय क्रतुं ॥१५॥ अन्येषां परिहारार्थमेष एव विधिः स्मृतः ॥ सा४
जगत्त्रयेपि नूनं स्याद्ध जचूर्णं नगाधिप ॥१६॥ ततस्तु क्षोभमहाशैलो नमस्कृत्य महेश्वरं ॥ ययोगत्वा कृतां देवीं पृष्ट्वा चैव तु
ऋत्विजान् ॥१७॥ स्नापयके कलशेनैव पार्वतीपर्वतेश्वरः ॥ सस्नौ चैव द्विजैं स्वयमात्मश्चैव विशेषतः ॥१८॥ संस्नाप्य मंड
पे शैलो भोजयन् सुसमाहितः ॥ एवं यज्ञस्ततो विप्रास्तर्पणाय चराचरं ॥१९॥ अप्रभवद्देवमुद्दिश्य शंकरं सगिरिस्तदा
॥ अथास्मिन्नंतरे देवो धर्महेतुर्महेश्वरः ॥२०॥ उषितो मुनिशार्दूलाः समालोक्य तु शाङ्गिणं ॥ अभवज्जयशब्दा
नां तुमुलः सुमहांस्तदा ॥२१॥ पुष्पवृष्टिनिपातश्च सप्तलोकाद्विजोत्तमाः ॥ वनाद्वनाधिपाश्चैव ऋतवश्च समुपान्विताः
॥२२॥ कुसुमैर्दिव्यगंधाद्यैर्ववर्षुर्मेघवच्च स्वत् ॥ वीणावेणुमृदंगानां दुंदुभीनां ततो रवः ॥२३॥ हरिर्विरिंचिः शक्रा
द्याः पूरयंति सुरासुराः ॥ त्रैलोक्यं मेघनादेन वेदघोषं प्रचक्रिरे ॥२४॥ गायत्री चैव सावित्री शची लक्ष्मी सरस्व ९
ती ॥ अदितिश्च दितिः कद्रूर्विनता याश्च तथापराः ॥२५॥ राकाकुहूसिनीवाली अपराधाधृतिर्मतिः ॥ गंगाद्याः सरि
तः श्याद्याः स्व[ल]शोरेव योषितः ॥२६॥ रंभाद्यप्सरसो दिव्या रुद्रकन्यास्तथैव च ॥ विद्याश्च यक्षिनी[न्या]देसानांप गि

स्य एव च ॥२७॥ सिंह कन्या मनोहार्यो यक्षकन्यास्तथैव च ॥ मातरः सप्त याश्चैव याश्च नक्षत्रमातरः ॥२८॥ गिरीणां
पत्न्य एवैताः सागराश्च सरांसि च ॥ मंगलं गायमानाश्च अर्घ्यमष्टांगसंयुतं ॥२९॥ सुप्रहृष्टाददुः सर्वा देवदेवस्य पादयोः ॥
एतस्मिन्नंतरे विप्रा हिमवंतप्रचोदितः ॥३०॥ मेनाकस्तत्र संप्राप्तो हेमकुंभकरः सुधीः ॥ शालंकायनपौत्रस्य गत्वा तस्या
ग्रतः स्थितः ॥३१॥ तेनापि देवदेवस्य स्नापितो गिरिराट् ततः ॥ अथासौ भगवान्देवो मंगलेशो जलाशयः ॥३२॥ स्नापय
द्देवसायुक्तः सम्मुखं शूलपाणिनां ॥ स्नाप्यमाने तदा देवे नद्यो वै सागरा द्विजाः ॥३३॥ बभूवुः सलिलैर्मुक्ताः कृशांगाः स्वे
दसंयुताः ॥ अथ ते त्रिदशाः सर्वे सनारायणकाद्विजाः ॥३४॥ परं विस्मयमापन्ना भवं पश्यंति याद्भुतं ॥ ततो निलीयमा नि
न स्तु शरीरे शंकरस्य तु ॥३५॥ न च सर्वाः समुद्राश्च प्रपश्यंति शुचिस्मिताः ॥ योगमायाहृतं चैव क्षपत्तोयं जगती
स्थितं ॥३६॥ अस्तुवन्नप्य शुभं भर्तारं ब्रह्माद्या देवतागणाः ॥ ततस्तैस्तु स्तुतो देवः प्रहस्य भगवान् भवः ॥३७॥ विस
१५ ज्य च तदा तोयमसंभूतं रूपधृक् ॥ एवं साम्ये स्थिते तस्मिन् देवदेवे पिनाकिनी ॥३८॥ स्नापितोसौ चिरं च्यायैस्त्रि
मूर्त्ति भगवान् भवः ॥ मेनाकोप्यंजलिं कृत्वा देवदेवस्य चाग्रतः ॥३९॥ संस्थितो हर्षसंयुक्तो शिथिलध्वाय यथा धनः
विसर्जितस्ततस्तेन देवदेवेन शंभुना ॥४०॥ त्रैलोक्यतिलके तस्मिन् ययौ तूर्णं नगात्मजः ॥ तारंस्तु कं परिधाप्य दे
वी तामरसेक्षणां ॥४१॥ स्नापयंस्तेन कुंभेन हरांघ्रिस्नापितेन च ॥ नीरपानं द्विजश्रेष्ठाः कृतमेतत्कपर्दिनं ॥४२॥
पर्वतं च विधिर्नूनं कुरुआनां सदानघ ॥ ततो भगवती देवी हृष्टपुष्टा तपोमयी ॥४३॥ पितुं रभ्याशंगा भूत्वा विवे

शापस्मासने॥४४॥इत्यादिपुराणे पंचपंचाशत्तमोध्यायः॥५५॥ ॥सूत उवाच॥अथायांतं शिवं दृष्ट्वा हिम
वान्पर्वतेश्वरः॥मेरुश्चैव यथासंख्यैरविचंद्रदिवाकरैः॥१॥कृतकृत्योजनः सर्वः सोत्सुको हृष्टपुष्टतः॥मंगल
ध्वनिपूर्णायां नगर्यां हर्षनिर्भरः॥२॥तथा देवं सर्वे धायेचर्तं छत्रेणसंयुतं॥जयेत्युक्का नरेंद्रस्तमांतमात्यांबरस्त
था॥३॥उत्थितः सहसा विप्राः पुष्पहस्तो महेश्वरं॥मेनयापरया युक्तो भक्त्या चानम्य याद्विजाः॥४॥चक्रैर्नाना
विधैश्चक्रे मार्गभूषां तदा गिरिः॥पताकाभिर्जयंतीभिः स्रग्दामैर्दिव्यगंधिभिः॥५॥ध्वजैश्च विविधाकारैः पंच
वर्णैर्मनोरमैः॥चामरैश्चंद्ररश्म्याभैर्लंबकैश्च समंततः॥६॥मुक्तानां प्रकरैश्चैव पुष्पाणां च तथैव च॥एवमाद्ये
रनेकैश्च शोभां चक्रे च नगोत्तमः॥७॥स्थितस्तु वीक्षमाणो सो विश्वव्यापिनमीश्वरं॥संपूर्णचंद्रवदना मदना
नलदीपिताः॥८॥ज्ञातको द्योप्सराणां च नियेयुः संमुखास्तु तं॥हेमपात्रकरासक्ताः पद्मं दीपरहस्तकाः॥९॥
मणिपात्राणि पूर्णानि दूर्वासिद्धार्थकाक्षतैः॥दधिरोचनमादाय स्त्रीहि भिश्चंपकै यथैः॥१०॥हरिचंदनलिप्तांग्यो
हरिचंदनहस्तकाः॥विद्रुमांकुरहस्ताश्च तथैवोत्पलशेखराः॥११॥चूतमंजरिहस्ताश्च पारिजातकरापराः॥
स्वाद्रूकनेन संपूर्णा भृंगारकरपल्लवाः॥१२॥हावभावविलासिन्यो मदनातुरविह्वलाः॥मदनारिं प्रणोमुस्ता
गायमाना स्त्रिलोचनं॥१३॥अथासो भगवान्शूली चांतर्यामी महेश्वरः॥त्रैलोक्यतिलके तस्मिन्क्षणाद्रा
विर्बभूव ह॥१४॥ततोधनैर्बहुविधैः पूजयामास सेर्वतः॥स्तुत्वा च पूजयित्वा च ननाम च पुनः पुनः॥१५॥

नाग० १०

(२०)

गीतैश्चविविधैर्वाद्यैः प्रविवेश हरस्तदा॥ देवोभवन्तदाबालोद्विरष्ट शरदाकृतिः॥१६॥ हेमांगो भगवान्शंभुः किरीटी कुंडली हरः॥ सुरासुराश्चविप्रेंद्रादृष्ट्वा रूपं पिनाकिनः॥१७॥ अवलोक्य मुखान्योन्यंजहसुस्तेमुदान्विताः आसने हेमजे विप्रा नानारत्नैश्चपूजिते॥१८॥ आविशद्भगवान् शूली महादेवो जगत्पतिः॥ हरस्य दक्षिणे वेधा वामभागे जनार्दनः॥१९॥ लोकादिरग्रतः शंभोः कालरुद्रश्च सुव्रताः॥ रुद्रैर्गणेश्वरैर्देवैः सिद्धैश्च मुनिभिस्तदा॥२० उपविष्टेषु सर्वेषु गंधर्वाद्याः समंततः॥ जगुर्गन्धिनं च हिंदोलं तुंबुरुर्नारदादयः॥२१॥ मत्तमातंगगामिन्यो गेयातालकलयान्विताः॥ रंभाद्याः प्सरसः सर्वाः किंनर्यो निन्नृतुर्द्विजाः॥२२॥ वीणावल्लकिवेणूनां मृदंगानां विशेषतः॥ ध्वनिभिर्मनसस्तुष्टिर्जज्ञे सुमनसस्तदा॥२३॥ अथ विश्वेश्वरः शंभुर्भूषणं न भासि स्थितः॥ प्राय च्छद्विरिजा येत समाहूय न गास कं॥२४॥ अनेनालंकृता देवी मम योग्या भविष्यति॥ पितुर्दक्षस्य यत्कोपं पूर्वं जस्य वरानना॥२५॥ प्रहास्यति तन्मे या शुभा यं चैव तु मानसं॥ ततः सा पार्वती देवी गृहीत्वा का शमंडलात्॥२६॥ पितुः समीपमगमद्वस्त्राभरणमुत्तमं॥ महत्ता स्तु सवे ना शु भूषयित्वाभिषेचांततः॥२७॥ वस्त्रैराभरणैर्दिव्यैर्देवे शूली सिंहवाहिनी॥ मेनोत्संगे गता भूपन्चं दृश्लेखेन्च तोयदे॥२८॥ दधती निर्वृता देवी बभौ ता मरसेक्षणा॥ अथ देवैः परिवृतो विष्ण्वाद्यैः त्रिपुरांतकः॥२९॥ बभ्राम मुनिशार्दूलाः क्रीडास्थानानि कृत्स्नशः॥ भगवन्सदमानेतुवि

(३१)

आदि०
५५

श्वेतशोधंकसूदनं॥३०॥ प्रणम्य परया भक्त्या शैलादीरिदमब्रवीत्॥ नंदिकेश्वर उवाच॥ देवेयमिंद्रनीलाभा भाति
विश्वंभरा शिवा॥ शेषं जलमयी नाथ निर्मिता विश्वकर्मणा॥३२॥ याचेयं परमा रम्या तोयानां भ्रांतिकारिणी॥ सेयं भा
ति महादेव रत्नानामीदृशी प्रभा॥३३॥ इदं यद्वारसंस्थानं दृश्यते लंबकेऽर्च्यते॥ कुड्यस्य रत्नचित्या सा लक्ष्यते द्वारिपू
रिता॥३४॥ इदं चित्रं रथाकारं दृश्यते च नमुत्तमं॥ प्रतिबिंबं महादेव रत्नभूमेर्न संशयः॥३५॥ इमं चनंदिकाका
रं सोपानमलमंडितं॥ प्रतिबिंबमिमं चैव दृश्यते तच मंडितं॥३६॥ याचेयं सागराकारा दृश्यते तोयरूपिणी॥ ए
प षापि रमेशान रत्नभूमिजलेर्पिता॥३७॥ यदिदं गगनाभासं भूर्न्निर्द्रव्येरिवोज्झितं॥ क्रीडामंडपमेतस्मिन्प्रदेशे
देवदेव तिष्ठति॥३८॥ अंबराभे महारत्ने बाह्यरेशो विनिर्मितं॥ अंतर्हेममयं दिव्यं विद्रुमाभैरलंकृतं॥३९
शैलादेर्वचनाद्देवो विश्वकर्म विनिर्मितं॥ अनेकरत्नसंयुक्तं रमणीयं मयोहरः॥४०॥ एवं क्रीडति देवेशो सु
घा० रासुरमहोरगाः॥ विद्याधरास्तथा यक्षा गंधर्वाप्सरसादयः॥४१॥ दीर्घिकासु तडागेषु नदीषु च ह्रदेषु च॥ क्रीडावा
पुत्रा रम्यैः पत्रैर्नानाविधैर्भृशं॥४२॥ बभूवुर्देवताः सर्वाः क्रीडारतिषु लालसाः॥ अथ सं क्रीडया विश्वात्मा निव
त्तेस्तत्प्रदेशतः॥४३॥ विद्यासमीपमगमत्स्तूयमानो मुनीश्वरैः॥४४॥ प्राप्याके होहे प्रसभं सुरेशास्तादिंद्रनीलो
मलवेदिकांतो॥ सहस्रपत्रैर्बकुलैश्च नागैः कीर्णं हि यत्कांचनपारिजातैः॥४५॥ ततः प्रविष्टो हरिणांकचि ११
ह्नः सरश्मिजालाकुलवेदिकांते॥ विवेश सूर्यायुतसत्प्रभा साचतो विरिंच्यादिसुरैः समंतात्॥४६॥ अथोपवि

२२

शं संवीक्ष्य विश्वेशं पर्वतेश्वरः॥ तस्य संस्थाप्य पुरतो देवेशमब्रवीद्वचं॥४७॥ हिमवानुवाच॥ त्वमेवैकः परंधाम अद्री
रीश्वरः स्ततः॥ देवतानां हितार्थाय जातो स्वर्दर्तेनुः पृथक्॥४८॥ दक्षस्य दुहिता देवी जगद्धात्री स्वमा सती॥ वि
निंद्य तत्तो दक्षं सत्कारे हं निजं पुनः॥४९॥ तवैव पत्नी देवेश जाता मम सुता सती॥ ततः श्रुत्वा गिरिंद्रस्य वचः वाक्य
शुभ्य नेश्वरः॥५०॥ प्रसन्नो वरदः शंभुः रब्रवीत्पर्वतेश्वरं॥५१॥ ईश्वर उवाच॥ जानाम्यहं येन मम सैव माया याशक्ति
यं रेषा नगराजराज॥ समं ज्यदेहं तव धाम्नि तां जो योगा स्वयं चारु शशांकवक्त्रा॥५२॥ आचारार्थं गिरिश्रेष्ठ दत्तां गृह्णामि
पार्वतीं॥ अदत्ता यदि गृह्णामि तथा लोके पिवर्त्तते॥५३॥ अथ दिव्योरवैः पूर्णमादाय कलशं गिरिः॥ परिपूर्णस्यानिसस्यानि
सानुग्रहरूपिणः॥५४॥ प्रक्षाल्य पादौ शिरसा प्रणम्य शृंगारमादाय स शैलराजः॥ मुमोच तोयं भवपाणिपद्मे ददौ ददौ तेति तं
दाप्रजल्पन्॥५५॥ ततो मंगलनिर्घोषः समभूत्रिदिवौकसां॥ वीणा वेणु मृदंगानां काहलानां च निःस्वनः॥५६॥ सा हारक
ठा कटिसूत्रदामा सुभ्रूलता चारु विशालनेत्रा॥ मेरोर्यथैवोपरि चंद्रलेखा तथा बभौ पर्वतराजपुत्री॥ अथ वेद्यां स्मरो ब्र
ह्मा विश्वमोयां स्मरारिणः॥ दृष्ट्वा दक्षपादांते चिभाव सुपुरस्थितः॥५७॥ महेश्वरीं काममयीं दृष्ट्वा तां तु पितामहः॥ अक्ष

नराभुक्तं

रत्समं दृष्ट्वा शुक्रं ब्रह्मस्कं भादिवोरकं॥५८॥ पादे न तत्क्षमर्दशुक्रं तस्माच्च संभवः॥ पद्मजोऽपि महातेजा देवस्य पश्यतः॥५९॥
मैवं मर्देति तं दृष्ट्वा त्रिपुरारिः पितामहं॥ कुरुष्वे ~~तां~~ होवाच भगवान्नीललोहितः॥६०॥ अमोघं तत्त्व धातिश्राः शुक्रमस्त्रो
प्रजापतिं॥ जुहोति च च नादं भो र्यामेना हायपाणिना॥६१॥ हवनाच्च ततः प्राप्ता सविता रवियग्रतं॥ तेजोमया श्च ते सर्वे

नि ७

नि मि २

तपोनिष्ठाः समंततः ॥६२॥ अष्टाशीतिसहस्राणि मुनयः स्तूर्ध्वरेतसः ॥ मानेनांगुष्ठमात्रास्तु जाताश्च सुवर्चसः ॥६३॥ ब
भूवुः स्ते [illegible] महात्मानः पतंगसहचारिणः ॥ निःस्पृहा रश्मिपाः सर्वे सर्वे ज्वलनसन्निभाः ॥६४॥ ततो देवाः सगंधर्वाः सिद्धा
श्च मुनयस्तथा ॥ पिशाचा मानवा देत्याः किंनराश्च महोरगाः ॥६५॥ विद्याधराश्चाप्सरसस्तथा चान्ये सुरासुराः ॥ प्रहृष्टाः स
सं४ र्व एवैते पार्श्वं साहसंगमात् ॥६६॥ मुमोच वृष्टिं सुरराट् सुतुष्टः पुष्पैरनेकैर्भ्रमराकुलैश्च ॥ वाद्यैर्विचित्रैर्वरशंखनादैः
सुगीतगानैर्वरमंगलैश्च ॥६७॥ वीणारवैर्दुंदुभिवेणुनादैः समंततः कर्णसुखं प्रजज्ञे ॥ आनृत्यतीभिः सुरसुंदरीभिर्जगीय
तीभिर्वरकिन्नरीभिः ॥६८॥ देशांगनाभिश्च दुवादिनीभिः कामायतेतीवततदुत्सवं च ॥ कांचीरवेण [illegible] थनितंबिनीनां म
नोभिरामेण च नूपुराणां ॥६९॥ तासां स्मितेनाथ मुनींद्र चर्याबभूव कामानलदीपनं च ॥ होमाय सानेम धुपर्कयुक्तं दे
या यतस्मि मणिभाजनं च ॥७०॥ ततो निवेद्य प्रमथाधिपाय चकार तुष्टिं परमां विरिंचिः ॥७१॥ अथ रदेवेषु विन्यस्तेव [illegible] ६
रदो भूद्विजोत्तमाः ॥ वरांश्च विविधान्दत्वा ब्रह्मादिभ्यो महेश्वरः ॥७२॥ विसर्जयत्ततः सर्वान् स्थावरान् जंगमांस्तथा ॥
विसर्जिताः प्रणम्येशं प्रीतिं ते परमां गताः ॥७४॥ एवं संक्षेपतो विप्रा विवाहो गिरिजापतेः ॥ कथितो रविणा पूर्वं
यथावत्संप्रदीरितः ॥७५॥ शृणोति श्रद्धया यस्तु पठेद्वा प्रयतामवान् ॥ सर्वान्कामानवाप्नोति यथा वर्षादयोग सेश
यः ॥७६॥ सर्वपापविनिर्मुक्तस्तेजस्वी प्रियदर्शनः ॥ जीवेद्वर्षशतं साग्रं गच्छेद्ब्रह्मपदं ततः ॥७७॥ इत्यादित्यपुराणे १२
षट्पंचाशत्तमोध्यायः ॥५६॥ सूत उवाच ॥ ॥ विवाह्याद्रिसुतां शंभुर्ययौ कैलासपर्वतं ॥ क्रीडां चैव सहस्रीमक

रीतत्र शंकरः ॥१॥ गणैर्नानाविधैश्चैव सिंहास्यैः शरभाननैः ॥ कैश्चिद्व्याघ्रमुखैर्भद्रैः कैश्चिद्गृध्रमुखैरपि ॥२॥
कैश्चिद्गजमुखैरन्यैः कैश्चिन्मृगमुखैस्तथा ॥ कैश्चिद्दुष्टमुखैर्दीर्घैः कैश्चिद्धयमुखैरपि ॥३॥ कैश्चित्सोत्रमुखै
२७ रन्यैः कैश्चिच्चक्रमुखैरपि ॥ मूषकास्यैस्तथा चान्यैर्मार्जारवदनैरपि ॥४॥ सर्पास्यैर्नकुलास्यैश्च जंबुकास्यैस्त
थापरैः ॥ शिशुमारमुखैश्चान्यैर्ऋक्षवक्त्रैस्तथापरैः ॥५॥ मयूरवदनैरन्यैर्बकवक्त्रैस्तथापरैः ॥ श्वाखामृगमुखै
श्चान्यैः खरास्यैश्च तथापरैः ॥६॥ अन्यैरसंख्यैः प्रमथैर्जरामरणवर्जितैः ॥ निसर्गतो निरातंकैः कालसंह
समारहिताः रणाक्षमैः ॥७॥ सहस्रकोटिसंख्यातैः स्वच्छंदगतिचारिभिः ॥ क्रीडां विधाय भगवान्कैलासे पर्वतोत्तमे ॥८॥
तपसा महता शंभुरतुग्रश्च मंदरं ॥ कैलासं संपरित्यज्य मंदरे चारुकंदरे ॥९॥ तत्रापि रममाणस्य गते व
र्षसहस्रके ॥ देवतानां हितार्थाय प्रस्रसासरुसूलभृत् ॥१०॥ क्रीडती तिह विश्वात्मा कामासक्तो यसर्वथा ॥ प्रा
र्थितो हं सुरैः पूर्वं तारकस्य वधेप्सया ॥११॥ मद्वीर्यतः समुत्पन्नस्तारकं स हनिष्यति ॥ इति मत्वा महादेवेरममा
णे सहोमया ॥१२॥ उत्पाताश्च महाघोराः संजाताः स्युः सुदारुणाः ॥ रुधिरास्थीनि वर्षंति नदंतो मेघसंकुलाः
॥१३॥ वायवश्च महावेगाः पर्वतांश्चालयंति ते ॥ विमानानि सुराणां च निपेतुर्वसुधातले ॥१४॥ उल्काभिर्ग
गनं व्याप्तं पतंती भिर्द्विजोत्तमाः ॥ केनचाश्चोदिताः सर्वे जंभंतश्च पावकाः ॥१५॥ दिग्दाहाश्च महाघोरा दावाग्नि

२४

आदि० ५७

रिवसंक्षये॥ मृत्युकालेयथाजंतुर्नैवसौख्यमवाप्नुयात्॥१६॥ जगत्त्रयमिदंकृत्स्नंनचलेभेततःसुखं॥ नचे
दाःपठितास्तस्मिन्नाचिप्राजजपुर्जपं॥१७॥ पार्वत्यांकंपमानायांकंपमानेचराचरे॥ त्रैलोक्यमभवत्तूर्णं ५२
कंपमानंभयातुरं॥१८॥ कालाग्निःकंपितोदेवोगिरिश्चर्षिभिःसह॥ चक्रायुधोपिचासर्वंमिंद्राद्यैःप
रिवारितः॥१९॥ येकेचिद्देवगंधर्वाःसिध्धागगनचारिणः॥ विद्याधराश्चयक्षाश्चसंप्राप्ताश्चवसुंधरां
॥२०॥ एतस्मिन्नंतरेःआगतःशक्रंदेवर्षिसत्तमः॥ यथावन्मधुपर्काद्यैःशक्रस्तमभ्यपूजयत्॥२१॥ अब्रवीद्दे
वराजस्तमुपविष्टंमहामुनिं॥ त्रिकालदर्शनंशांतमासनेविष्टंतपोनिधिं॥२२॥ शक्र उवाच॥ उत्पाताश्चम
हाघोराःसुप्रवृत्ताःसुदारुणाः॥ कारणंवदमेसर्वंशांतिश्चैवयथाभवेत्॥२३॥ नारद उवाच॥ उमयास
हविश्वेशःपरंज्योतिर्महेश्वरः॥ अहर्निशमविश्रांतंयुक्तएप्रवर्त्तते॥२४॥ तस्माद्धेतोप्रवर्त्तंते उत्पाताः
चात्रहनकिल॥ विघ्नंतस्यप्रकर्त्तव्यंयदिच्छसिपरंसुखं॥२५॥ उमागर्भात्समुत्पन्नःसर्वस्मादधिकोहिसः॥ नतंधारयितुं
शक्ताब्रह्माद्याःससुरासुराः॥२६॥ जगत्त्रयमिदंकृत्स्नंधरणीधारयिष्यति॥ नापसधारणेशक्तासंजातंविचयोःख
लु॥२७॥ नारदस्यवचःश्रुत्वाशक्रोविस्मयतांगतः॥ तदाचिंतार्णवेमग्नोदेवैःसहपुरंदरः॥२८॥ पंकेगौरिवसीदत्सु
देवेषथजनार्दनः॥ उवाच श्लक्ष्णयावाचादेवानांहितकाम्यया॥२९॥ श्रीविष्णुरुवाच॥ शृणुध्वंदेवताःसर्वा
श्लो

१३

(26)

कामासक्तो न शंकरः ॥ युष्माकं हितकामाय भोगयुक्तो भवच्छिवः ॥ ३० ॥ स्वतंत्रशक्तिर्विश्वात्मा जितकामः स्वभा
वतः ॥ संपूर्णकामः स विभुः कथं कामेन बाध्यते ॥ ३१ ॥ तद्रेतसः समुत्पन्नस्तारकं स वधिष्यति ॥ एतस्मात्कारणाद्दे
वो देव्या युक्तो भव सुराः ॥ ३२ ॥ किंतु देव्यां समुत्पन्नः सेंद्रैरपि सुरासुरैः ॥ तेजो धारयितुं तस्य न शक्यमिति निश्चि
तं ॥ ३३ ॥ इदं यत्कार्यमुत्पन्नं व्याधिरूपं दिवौकसां ॥ उपेक्षितं न संदेहो हन्यान्नूनं जगत्त्रयं ॥ ३४ ॥ यदि तल्लेच
ले जातो भविष्यति सुरास्तदा ॥ असह्यो दुर्द्धरो घोरो इति तत्थ्यं न संशयः ॥ ३५ ॥ स एव च विष्णुर्बलवानिंद्रश्चैव प्र
जापतिः ॥ स वादित्यः कुबेरश्च ईशानो वरुणस्तथा ॥ ३६ ॥ स यमः स च सोमश्च स वायुः स्वर्गवासिनः ॥ स ए
व सर्वं भविता भवद्भिर्यद्युपेक्षितः ॥ ३७ ॥ दृश्यतेत्राप्युपायश्च कार्यस्यास्य सुरोत्तमाः ॥ यस्मादग्निमुखा
यूयं तस्मादग्निर्हि नान्यथा ॥ ३८ ॥ यद्दुर्गं गहनं घोरमप्यदृश्यमगोचरं ॥ हदियभवतां कार्यमग्निस्तत्साधयिष्यति
॥ ३९ ॥ एवमुक्तो विश्वादिः शंखचक्रगदाधरः ॥ अब्रवीद्धव्यवाहनं देवानां सदसि स्थितं ॥ ४० ॥ श्रीविष्णुरुवाच
॥ शृणु मद्वचनं वह्ने देवानां यदुपस्थितं ॥ त्वया तत्साधनीयं हि हितार्थं त्रिदिवौकसां ॥ ४१ ॥ योसौ देवः परं ज्योतिर्नील
ग्रीवो विलोहितः ॥ रमते पार्वती सार्द्धं सुरासुरपतिः शिवः ॥ ४२ ॥ भयं तस्मात्समुद्भूतं कारणाद्धि दिवौकसां ॥ तस्मा
द्धिताय गच्छ त्वं महादेवस्य सन्निधौ ॥ ४३ ॥ मुख्यस्त्वमेव सर्वेषां कार्याणां चैव साधकः ॥ इत्येवं वचनं श्रुत्वा पावकः
केशवात्तदा ॥ ४४ ॥ उवाचेदं मुनिश्रेष्ठाः श्रीवत्सांकितवक्षसं ॥ ४५ ॥ अग्निरुवाच ॥ यदुक्तं भवता देव किं त्वयुक्तं स

दु

नातनं॥ महेशस्य रहस्यस्य प्रवेष्टुं नैव सांप्रतं॥४६॥ ध्यानयुक्तो जनः कश्चिन्मंत्रभोजनतत्परः॥ रहस्योप्यथ दानस्थ
स्तदा युक्तं प्रवेशनं॥४७॥ आप्योपहारयुक्तो वा होमयुक्तोथवा भवेत्॥ अर्चनाभियुतः कश्चित्तदा युक्तं प्रवेशनं॥४८॥
सामान्यस्यापि देवेश रहस्यस्य समापतेत्॥ तस्मिन्काले सुरेशानां गर्हितं तु प्रवेशनं॥४९॥ किंपुनर्भगवान्भीमस्तिग्म
रश्मिर्महेश्वरः॥ देवानां च हितार्थाय प्रवृत्तः सह संगतः॥५०॥ नाहं तत्र प्रवेक्ष्येयं बिभेमि मधुसूदन॥ आगतं मां
समालोक्य क्षणाद्भस्म करिष्यति॥५१॥ जुगुप्सितमिदं कार्यमिति कष्टं मया बहु॥ विवस्त्रां जननीं देवीं कथं द्रक्ष्यामि के
शव॥५२॥ किं वक्ष्यति प्रविष्टस्य वक्ष्यामि किमिदं विभो॥ पातयिष्यति मां देवो धिक्कृत्य लोपयिति ध्रुवं॥५३॥ यस्मा
द्भीतस्य तत्त्व यत्नं करोमि विनिंदितं॥ अग्निना चैवमुक्तस्तु विष्णुर्दनसूदनः॥५४॥ भयदं मोहदं श्रुत्वा वाक्यं हृदय
कंपनं॥ उवाच भगवान्विष्णुः पुनर्वह्निमिति स्तुवन्॥५५॥ त्रैलोक्यरक्षणार्थाय शक्रादीनां च सन्निधौ॥ श्रीवि
ष्णुरुवाच॥ यदुक्तं भवता तात वह्ने सत्यमेतन्न संशयः॥५६॥ आसहे तोचितं रूपं तस्या सरार्थे नैव दुष्यति॥ प्रविष्टं
देवदेवोयं संहारे देव कपर्दिनं॥५७॥ प्रविश्य ब्रह्मणो रूपमादाय न दहिष्यति॥ प्रस्तुताप्रस्तुतं नास्ति तेजोमूर्ते तवा
नघ॥५८॥ सर्वदा सर्वगस्त्वं हि न कश्चित्प्रतिहन्यसे॥ भूतग्रामं समस्तं वै त्वमेको व्याप्य तिष्ठसि॥५९॥ उदरस्थः पचस्य
स्य त्वं प्राणिनां मेषवाहन॥ त्वय्येकेन जगत्सर्वं गोप्यते यदि पावक॥६०॥ किं न प्राप्तं त्वया ब्रूहि को दोषस्ते हुताश
नः॥ जुगुप्सा मिन्नयकर्तव्या नच्च ह्रीर्हव्यवाहन॥६१॥ उपसन्नस्य कार्यस्य काल एव ततानघ॥ त्रिदशाः शरणं प्रा

प्ता हुतभुक्ते विभावसो॥६२॥ अहो धन्यतरश्चासि यच्छ्लाघ्यो यदि करिष्यसि॥ कुरु कार्यं सुराणां त्वं मग्नानां किरणा
कुल॥६३॥ पर्वकाले यथा मन्त्री वीक्ष्यमाणास्तु भास्करं॥ तथा तथा न यं चक्रे तिष्ठंति सुरपुंगवाः॥६४॥ न्यास्य चंद्रप्र
तीकाशं कुंडलाभ्यामलंकृतं॥ अनेन किं न पर्याप्तं चंदनूनं विभावसो॥६५॥ एवं संबोध्यमानोग्निर्विष्णुना द्विजस
त्तमाः॥ हृदये चिंतितं तेन यास्यामि हरसन्निधौ॥६६॥ ततो मनोगतं ज्ञात्वा अग्नेर्देवास्तदानघाः॥ संक्रुद्धाश्चकृणा सर्व
दिशाः सयक्षोरगराक्षसाः॥६७॥ तुष्टुवुस्ते शुभैर्वाक्यैः पावकं द्विजसत्तमाः॥६८॥ इत्यादिसपुराणे सप्तपंचा
शत्तमोध्यायः॥५७॥ ॥देवा ऊचुः॥ जलभीरो जलोत्पन्न जलाजल जलेश्वर॥ जलजामलरूप त्राक्षं यज्ञदेह हुता
शन॥१॥ कृष्णकेतो कृष्णवर्त्मन् स्वर्गमार्गप्रदर्शक॥ यज्ञाहुतिहुताहार यज्ञाहार हराहुते॥२॥ पूर्णगर्भगयां
गर्भज यदेव महाशन॥ नमो हर महाहार स्वाहाभर्त्र नमोस्तु ते॥३॥ हव्यवाहन सप्तार्चे चित्रभानो महामूर्ते॥ अ हधु६
नलाग्ने यज्ञमुख अजय पावक सर्वग॥४॥ विभावसो महाभाग वेदभाषार्थभाषण॥ कृशानो क्रतुसंभार प्रियानि
ष्प्रभावन॥५॥ सांगरां बुध्य तं देव त्वमेवं भुवनं स्वसंश्रितः॥ पिबंश्चैवोद्गिरंश्चैव नत्वातिमधिगच्छति॥६॥ त्वं वा
केषु मनुवाकेषु निषत्सु पनिषत्सु च॥ ब्राह्मणा ब्रह्मयोनिस्थं स्तुवंति त्वां परायणाः॥७॥ तुभ्यं हुत्वा नमो विप्राः
स्वकर्मविहितां गतिं॥ ब्रह्मेंद्रविष्णुरुद्राणां लोकानां प्राप्नुवंति च॥८॥ त्वमंततः सर्वभूतानां भुंक्ते भोक्ता जगत्पते॥ प हन
चसे पचतां श्रेष्ठ त्रीन्लोकान्संक्षयस्पति॥९॥ साक्षि लोकत्रयस्यास्य त्वया तुल्यो न विद्यते॥ शरणं भव देवानां वि

सम अजेय कृपा पावक मुख कुल्याः सर्व कर्मोपलाः तेभुस श्रितोदित्तिभाः

आदि० ५८

शायन्महेश्वरः॥१०॥ सूत उवाच॥ इत्येवं स्तूयमानोसावुत्थायज्वलनस्तदा॥ देवान्प्रदक्षिणीकृत्य ययौ शंभुगृहं द्वि
जाः॥११॥ तत्रापश्यत्सतीहारं महादेवस्य मंगलं॥ पूजितं सेंद्रकैर्देवैर्महादेवदिदृक्षुभिः॥१२॥ कोपींद्रचंदनंदेवं कुलिशो
द्यतपाणिनं॥ भूरुहस्तं महावीर्यं सूर्यायुतमिवोदितं॥१३॥ नंदिनं तु तदा दृष्ट्वा पावकः [illegible] द्विजोत्तमाः॥ वेगस्तस्यातु सती नि३
श्रु० ष्णः सह सेवया हन्यत॥१४॥ तत्र स्थं चिंतयामास पश्यामीति कथं हरं॥ नंदिना द्वारसंस्थेन कः पुमान्प्रविशेद्गृहं॥१५ ना४
पश्यमानस्य शैलादेः प्रविशेय यहं गृहं॥ फलसिद्धिं न गच्छेत नंदिना कुपितेन च॥१६॥ एवं चिंतां गतो वह्निर्योगेनान्नि
ष्ठप्रसौकचिः॥ द्विजान्नानाविधांस्ताव न्क्रमणां स्पृष्टवान्॥१७॥ तान्दृष्ट्वा चिंतयामास हंसस्य हरसन्निधौ
रूपं कृत्वा प्रविश्यामि द्रष्टुं पापमचिंतयत्॥१८॥ आदाय हंसरूपं च प्रविष्टः पावकस्तदा॥ प्रविश्य तत्र निःशं
कः सूक्ष्मरूपो व्यवस्थितः॥१९॥ पार्श्वे सा वाहनं सिंहं अथापश्यद्विभावसुः॥ गोक्षीरधवलाभासं महालांगूलशो
भितं॥२०॥ आज्वल्यमाननयनं चंद्रकोटिसमप्रभं॥ प्रसारितसटाटोपं हुंकाराकृतभीषणं॥२१॥ दानवानां क्ष
यकरं देवानामभयप्रदं॥ हुंकारेणाततस्तस्य ज्वलनो बधिरीकृतः॥२२॥ आहो दुःखमिदं प्राप्तमिति संचिंत्य सच्चे
तसा॥ यदि जीवन्नगमिष्यामि सिंहाद्यस्मादहं तदा॥२३॥ तेन पर्याप्तिका मोहमिति संचिंत्य निर्गतः॥ यत्र देवा उ
पेंद्राद्याः संस्थिता मेरुमूर्द्धनि॥२४॥ देवाः सर्वे सुसंहृष्टाः प्रोचुस्तं जातवेदसं॥ देवा ऊचुः॥ अस्मात्कार्यं त्वया १५
यन्नेगतात्तत्र यथा कृतं॥२५॥ तत्सर्वं ब्रूहि नः क्षिप्रं शर्मास्माकं यथा भवेत्॥ अग्निरुवाच॥ गतोहं तत्र भव

३०

नंदेवदेवस्य शूलिनः ॥२६॥ मया नंदीश्वरो दृष्टो द्वारदेशउपस्थितः ॥ हंसरूपं ततः कृत्वा प्रविश्यांतः पुरं सुरा ॥२७॥
ततः सूक्ष्मवपुर्भूत्वा यावत्क्षणमहं स्थितः ॥ तावत्संध्यानतो दृष्टो गिरिजायास्तु वाहनं ॥२८॥ अतिरौद्रो महाकायः
स्माद प्रलयांतकसन्निभः ॥ भीतोहं निर्गतः स्तासं दृष्टैव पिनाकिनं ॥२९॥ युष्मत्कार्यमकृत्वैव संप्राप्त इह भो सुराः ॥ पु
नर्विचिंत्यतां कार्यं सर्वेषां नो यथा सुखं ॥३०॥ एवं वन्हेर्वचः श्रुत्वा देवा विष्णुपुरोगमाः ॥ ययुर्मुनिगणैः सार्द्धं मं
दरं चारुकंदरं ॥३१॥ तमासाद्य गिरिश्रेष्ठं प्रियं देवस्य शूलिनः ॥ कृतांजलिपुटाः सर्वे स्तुवन्वृषभध्वजं ॥३२॥
देवा ऊचुः ॥ ॐ नमः परमेशाय त्रिनेत्राय त्रिशूलिने ॥ विरूपाय सुरूपाय पंचाशाय त्रिमूर्त्तये ॥३३॥ वरदाय व स्मादि
राहाय कूर्माय च मृगाय च ॥ नीलकंठाय रुद्राय मंडलेशाय ते नमः ॥३४॥ विश्वमानाय विश्वाय विश्वेशाय
स्वरूपिणे ॥ कालघ्नाय मखघ्नाय अंधकघ्नाय ते नमः ॥३५॥ नमो मंत्राय जप्याय कोटिजाप्याय ते नमः ॥ ध्यानाय ध्ये
यरूपाय ध्येयध्यानात्मने नमः ॥३६॥ ईशानीशस्त्वमेवेश अंतानंतस्त्वमेव च ॥ अव्ययस्त्वं व्ययश्चैव जन्माज
न्म त्वमेव च ॥३७॥ निस्सानिसस्त्वमेवेश धर्माधर्मस्त्वमेव च ॥ गुरुस्त्वमगुरुर्देव बीजं चाबीजमेव च ॥३८॥ साक्षी
त्वं कर्मणां देव तत्वार्थ साक्षी महेश्वर ॥ शास्ता शास्त्राविरूपाक्ष ध्रुवमध्रुवमेव च ॥३९॥ संसारित्वं हि जंतूनामसं
सारी त्वमेव च ॥ कालस्त्वमसि लोकानामकालः परिगीयसे ॥४०॥ बलस्त्वमबलश्चैव प्राणश्चाप्राण एव च ॥
गोप्ता त्वं सर्वभूतानां नास्ति गोप्ता तवेश्वर ॥४१॥ जीवस्त्वं जीवलोकस्य जीवस्त्वत्तो न विद्यते ॥ न्यूनातिरिक्तभावे

आदि०
५८

नस्त्वमायुष्य शरीरिणां ॥४२॥ देहिनां शंकरस्त्वं हि न चान्यस्तात शंकरः ॥ अरुद्रस्त्वं महादेव रुद्रस्त्वं भावकर्मिणां ॥४३
देवानां त्वं महादेवो महांस्त्वत्तो न विद्यते ॥ कामस्त्वं भविनां शार्व अकामस्त्वं जगत्पते ॥४४॥ अजेयो जयिनां श्रेष्ठो जय रु
द्र यानां त्वं महादेवो महांस्त्वत्तो न विद्यते ॥ कामस्त्वं भविनां शार्व अकामस्त्वं जगत्पते ॥४४॥ [?]
पस्त्वमेव हि ॥ पुराणपुरुषस्त्वं हि पुराणो न्यो न विद्यते ॥४५॥ व्यालयज्ञोपवीताय सरोजांकाय ते नमः ॥ नमोस्तु नीलग्री
वाय शितिकंठाय मीढुषे ॥४६॥ नमः कपालहस्ताय पाशहस्ताय दंडिने ॥ नमो देवाधिदेवाय नारायणनुताय च ॥४७॥
ऊर्ध्वमार्गप्रणेताय नमस्तेस्तूर्ध्वरेतसे ॥ क्रोधिने वीतरागाय जेगे चर्माय मुंडिने ॥४८॥ नमो ब्रह्मशिरोघ्नाय नम
स्तेरुक्मरेतसे ॥ नमश्चंडाय धीराय कमंडलुनिषंगिणे ॥४९॥ नमः प्रचंडवेगाय क्रोधचंडाय ते नमः ॥ वरेण्याय श
रण्याय ब्रह्मण्यायांबिकापते ॥५०॥ सर्वानुग्रहकर्त्रे च ज्ञानदाय नमो नमः ॥ नमः संसारपोताय अणिमादि
प्रदायिने ॥५१॥ ज्येष्ठसामादिसंस्थाय रथंतररथाय च ॥ त्रिगाधाय त्रिमार्गाय त्रिमूर्ते त्रिगुणात्मने ॥५२॥ त्रिवेदि
नो त्रिसंध्याय त्रिशून्याय त्रिकर्मणे ॥ त्रिदेहाय त्रिकालाय त्रिशक्तिव्यापिने नमः ॥५३॥ शक्तित्रयविहीनाय श
क्तित्रयहिताय च ॥ शक्तित्रयात्मरूपाय शक्तित्रयधराय च ॥५४॥ योगीशाय विषघ्नाय विजयाय नमो नमः ॥ न
मस्ते हरिकेशाय लोकपालत्रिदंडिने ॥५५॥ हलीशाया प्रमेयाय नकुलीशाय चक्रिणे ॥ नमो बिंदुविसर्गाय नादा
यानादधारिणे ॥५६॥ नाडीस्थाय च नीडाय नाडीनाडाय वै नमः ॥ नमो गायत्रिनाथाय गायत्रीहृदयात्मने ॥५७॥ नमो

१५

॥ गायत्रीगोमायगायत्रायनमोनमः॥ यइदंपठतेस्तोत्रंगीर्वाणैः समुदीरितं॥५८॥ यावज्जीवकृतैः पापैः मुक्तोयातिपरांगतिं॥ एवं
स्तुतः सुरैः शंभुः प्रसन्नोवरदोभवत्॥५९॥ वरंवृणीध्वंहेदेवाइत्युवाचमहेश्वरः॥ अथतंवरदंज्ञात्वा शंभुमग्निमुखाः
सुराः॥६०॥ ऊचुः प्रांजलयः सर्वेभयं त्यक्त्वादिजोत्तमाः॥ देवाऊचुः॥ यदितुष्टोसिविश्वेशदेहिमंवरमुत्तमं॥६१॥ गिरिजा
कुक्षिसंभूतः पुत्रोमाभूत्तवानघ॥ एवमस्त्विसतो शंभुरुक्त्वाप्राहपुनर्वचः॥ नाहं रेतोच्यवास्कंदेत्रैलोक्यक्षयकारणा
त्॥६२॥ च्यवितास्मिशुक्रेमदीयेतुत्रैलोक्यंभस्मसाद्भवेत्॥ हितायतस्माल्लोकानांममरेतोदिवौकसः॥६४॥ शांत्यर्थंचैवयु
ष्माभिः शीघ्रमेवप्रयुज्यतां॥ एवंशंभोर्वचः श्रुत्वादेवास्तेभयविह्वलाः॥६५॥ सलोकेशाः सगोविंदाः नकिंचिदब्रु
रि वन्द्विजाः॥ अथदेवेषुसीदत्सुवन्हिगौरींवकर्दमे॥६६॥ प्रसार्यस्वांजलिंशंभोरेतोमुंचेतिचाब्रवीत्॥ देवदेवामृतं
दिव्यं हस्ताभ्यांममशंकर॥६७॥ शीघ्रमेवप्रयच्छस्वपिबंतुसुरपुंगवाः॥ ततोलिंगाद्विनिष्क्रांतं चंद्रबिंबांशुनिर्मलं॥६८
जातीनीलोत्पलामोदंपाणौवन्हेर्ददौशिवः॥ कराभ्यांपतितंरेतोभगवत्सात्वकस्पवै॥६९॥ पपौवन्हिस्ततः शुक्रंज्व
लंतंभास्करप्रभं॥ सुधेतिमनसामत्वाप्रहृष्टामुदयान्विताः॥७०॥ अथपीतेतदाशुक्रेवन्हिनामुनिपुंगवाः॥ रेतःपा
स्कं२ नेनसंतर्प्यसदेवासुरपूजिताः॥७१॥ विसर्ज्यतांस्तुभगवांस्तत्रैवांतरधीयत॥७२॥ ततश्चहविर्भुजंदेवंसेंद्रावन्हिपुरोगमाः
ययागतास्तुतत्रपूजयित्वादिवौकसः॥७३॥ रेतसारस्वमानोग्निःपातालात्सुतलंगतः॥ ततोविवेशगिरिशोयत्रा
स्तेपार्वतीशिवा॥७४॥ उवाचपार्वतीशंभुः अहंस्कमलेक्षणा॥७५॥ ईश्वरउवाच॥ शृणुदेवीमहाभागेयद्वृत्तंतद्व्रवी
स

आदि०
५८

ष्यहं॥ स्वतंत्रकामासि शिवे तथाहं नरवर्णिनि॥७६॥ अदेवामक्षरूपं आस्थानचाहं शरणं सुजे॥ मोप्यामयासहकांते मभ्द
क्तास्तेयतः स्मृताः॥७७॥ भविष्यति महाभागे पुत्रस्तव षडानन॥ किं त्वोरसस्तु सुश्रोणि देवैर्नेष्टस्तवांबिके॥७८॥ तस्मा
द्भूतं समया रेतो मुखे वै जातवेदसः॥ वह्नि कुक्षिगतं रेतो गतं देव्यान्विभागशः॥७९॥ षष्ठेषमुद्भूतं वह्निस्तद्गंगायां प्र गं
दास्यति॥ ततः सापि विदह्यंति मम तेजः प्रतापवान्॥८०॥ कृत्तिका षट्समाख्याता गंगायां स्नातुमागताः॥ तासुगं
गा चिनिक्षिप्तं मम रेतस्त्वद्भुतं॥८१॥ ततस्ता कृत्तिकास्तत्र देवि मां शरणं गताः॥ अनुग्रहान्मयाता सामिदमुक्तं
मयाशिवे॥८२॥ मम्मादेशात्कृताः सर्वाः शरधानवनं शुभं॥ मोचयिष्यति तागर्भं देवाश्च कमलेक्षणाः॥८३॥ त्वन्च
नान्म म सुश्रोणि गर्भश्चाप्स्य वरानने॥ ततस्ते भाविता पुत्र एकीकृत्वा स्वतेजसः॥८४॥ बालः सूर्यायुतः प्रख्यो बा
लेंदुभूलतांकितः॥ आग्नेयो वह्निजो देव औमो गांगेय कार्त्तिकः॥८५॥ स्कंदो गुहस्तथा पुत्रो नामभिस्तो भविष्यति
॥ एवं श्रोभोर्वचः श्रुत्वा प्राह देवी गिरींद्रजाः॥८६॥ मम कुक्षिसमुत्पन्नं यतो नैच्छंति पुत्रकं॥ अतः पुत्राविहीनास्ते
भविष्यंति सुरादयः॥८७॥ यो सौ नंदीमहावीर्यः सुरासुरमहोरगैः॥ दुर्जयः सर्वभूतानां योगी योगबलान्वितः
॥८८॥ प्रविश्यांतः पुरे वह्निर्दृष्ट्वा मां वस्त्रवर्जितां॥ यस्मादुपेक्षितस्तस्मै मनुष्यत्वं प्रयातु सः॥८९॥ शापं श्रुत्वा स
स्मा३ श्रौलादिर्वज्रेणेव हतो गिरिः॥ न्यपतद्योगिनामग्र्यो ज्ञानमूर्त्तिर्धरो द्विजाः॥९०॥ पुनश्च प्रशंभोर्वचनाच्छैलादिमनुग्र १७
हच्च॥ समालिंग्य महादेवं स्थिता देवीति नः श्रुतं॥९१॥ इत्यादि सपुराणे अष्टपंचाशत्तमोध्यायः॥५८॥ ७॥

ऋषय ऊचुः॥ वह्नौ संतर्प्पिते सूत नरे तस्मात्त्रिदिवौकसः॥ सगर्भाः खलु संजाताः देवदेवेन शंभुना॥१॥ सौख्यं क
थमवापुस्ते उदरस्थे नरे तत्सा॥ किमकुर्वंस्ततः सर्वे नारायणपुरोगमाः॥२॥ गर्भनिष्क्रमणं तेषां मुसन्नेन चार्विक्र
तं॥ एतत्सर्वं समासेन ब्रूहि नः सूत पृच्छतां॥३॥ सूत उवाच॥ वह्नौ संतर्प्पितास्ते नरे तस्मात्त्रिदिवौकसः॥ रेतसा
च्चोदरस्तेन संतप्तास्ते सुरादयः॥४॥ दशापंच सहस्राणि मतीतेषु द्विजोत्तमाः॥ वर्षाणां वत्सराश्ठो चगूढगर्भा
दिवौकसः॥५॥ दुःखिताः पार्वतीकांतं शंकरं शरणं ययुः॥ ऊचुः प्रांजलयः सर्वे सूर्यकोटिसमप्रभं॥६॥ दे
वा ऊचुः॥ भगवन्यदिदं सर्वं गर्भजं देहशोषणं॥ यथा नश्यति देवेश तदुपायं कुरु प्रभो॥७॥ वह्निनापीतमात्रे
ण रेतसा तव शंकर॥ वयं सगर्भाः संजाता गर्भकाले व्रतोयदाः॥८॥ उपहास्यमिदं देव पुंसां यद्गर्भसंभवः॥ सर्वे
वैभक्ष्यामुद्विग्नास्तव तेजो वशादिभो॥९॥ दस्त्रमानाम महादेव नरके पापिनो यथा॥ शरणं भव देवानां करालं बंदस्व
नः॥१०॥ दुःखोदधौ दुरुत्तारे प्रणतार्त्तिविनाशन॥ एवं श्रुत्वा तु वचनं देवानां पार्वतीपतिः॥११॥ दृषद्विहस्य
भगवानुवाचेदं सुरेश्वरः॥ भवद्भिरीदृशं कार्यमिष्टं वै सुरपुंगवाः॥१२॥ नेष्टं देव्योदरस्थं हित्वा स्माद्गर्भदशां ग
ताः॥ इदानीं यत्र कर्त्तव्यं शृणुध्वं तत्सुरोत्तमाः॥१३॥ वह्निं पूर्यं पुरस्कृत्य समेरुं व्रजत मंदिरात्॥ शरायधान वने यूयं
ऋद्धोसंगां पथूपतां॥१४॥ निष्क्रमिष्यत्स संदेहस्ततः सौख्यमवाप्स्यथा॥ ततः शंभोर्वचः श्रुत्वा नारायणपुरोग
ह्

आदि०
५९

मा:॥१५॥अग्निमन्विष्य च यत्पुमेर्कं गिरिवरोत्तमं॥तस्य चोत्तरदिग्भागे शरवाणे वने शुभे॥१६॥उपविश्य महात्मानो मध्ये सं
स्थाप्य वेधसं॥नारायणं पुरस्कृत्य सप्त सूताः सर्वदेवताः॥१७॥गर्भशल्यविनिर्मुक्ता जातास्ते सुखिनो द्विजाः॥शार्वेण तेजसा ते
न रंजितो मेरुपर्वतः॥१८॥ततः कांचनतां प्राप्तः सशैलवनकाननः॥सर्वतेजोच्छ्रितं यस्माद्देवैश्चक्रपुरोगमैः॥१९॥तस्माज्जरा
दिनिर्मुक्ता अमराश्च द्विजोत्तमाः॥सिद्धाश्च मुनयश्चैव ये केचित्तत्र संस्थिताः॥२०॥तृणगुल्मलताश्चैव जलस्थलरुहाश्च
ये॥सर्वे कांचनसंकाशाः संजातास्तत्प्रभावतः॥२१॥पार्श्वं मेरोर्विनिर्भिद्य शंभोस्तेजो विनिर्गतं॥गंगायां निहितं यच्च
तद्देवकस्यप भूद्द्विजाः॥२२॥अथ देवो महादेवस्तेजोराशिरुमापतिः॥गोपयामास तत्तेजः पिंगलं प्रेक्ष्य शंकरः॥२३॥गोप्यमा
नेन तदा तस्मिन्नभवत्सूर्यायुतप्रभः॥वर्षाणां तु सहस्रेण कर्मिणे स्कंदतां गतः॥२४॥स्कंद इत्युच्यते तेन तदाप्रभृति सुव्र
ताः॥हराज्जातो यतस्तेन कुमार इति कथ्यते॥२५॥स्कंदः कुमारः षड्वक्त्रस्तथा द्वादशलोचनः॥भुजैर्द्वादशभिश्चैव शोभ
मानोभवत्तदा॥२६॥कृत्तिकादेशात्पुनस्तास्तु कृत्तिकाः परमोज्वलाः॥ताभिः क्षीरं यतो दत्तं कार्त्तिकेय इति स्मृतः॥२७॥गर्भपं
काचिलिप्तांगो गंगायां स्नापितः प्रभुः॥तप्तचामीकराभासः शरवाणवने तदा॥२८॥नाम्नां सहस्रेण तदा कुमारो वेधसास्तु
तः॥मुमोच नादमुत्थाय सर्वभूतभयंकरं॥२९॥पातालं भेदयित्वा तु तत्र गंगा शतधा कृतं॥सिंहारयोपितत्र स्थास्तेन ना
देन सूदिता॥३०॥ततस्तं क्रीडमानं तु दृष्ट्वा देवं शिवात्मजं॥पिंगलो देवदेवेशं ज्ञापयामास शंकरं॥३१॥पश्य त्वं देवदेव क्री
डमानं कुमारकं॥सूर्यायुतप्रतीकाशमास सूनुं षडाननं॥३२॥ज्ञापितः पिंगलेनेशो वाक्यं देव्यै तदा वह॥वरो वरेण्यो

हि

१८

यदा सोचिंत्य कार उवाच ह ॥३३॥ ईश्वर उवाच ॥ गच्छावएहि देवेशि मेरुं यत्र सुतस्तव ॥ पश्याव स्तं चरा यो हे कुमारं चै

षडाननं ॥३४॥ पुरा त्वयेत्थं कनकाचभासं प्रधावमानं प्रातसूर्यकल्पं ॥ षडाननं कार्मुकपाणिमग्रे समागता सौ ज्वलनो

पदृष्ठा ॥३५॥ त्रैलोक्यनाथौ जगतः प्रदीपौ उवाच चान्विच्छ रदं कुमारं ॥ हारांबिके द्वौ पितरौ तवैतौ त्वामागतौ दृष्टुम

नंतवीर्यं ॥३६॥ प्रजाः स्रजौ तौ प्रमथाधिनाथौ गतो यच नेहोर्ग दितं निशाम्य ॥ ततस्तु नत्वा गिरिजां कगो भूत्तं सा चु

चुंबे मुहुरंकसंस्थं ॥३७॥ अतृप्यमाना कमलं सभाषिणं पुनः पुनस्तं नयनाभिरामं ॥ उमां संके स्थितो मदनारिसू

नुः करेण तस्यास्तिलकाल कौतु ॥३८॥ ममर्द शंभोश्च भुजंग हारौ जग्राह चंद्रं च कपर्दसंस्थं ॥३९॥ पंचत्वास्यापितृः

सो थषष्टश्यापष्ठि प्रियो गुहः ॥ चतुर्थ्यामगतिं स च्छात्रैलोक्यं हंतुमुद्यतः ॥४०॥ अबाधयत्तदा बालो जंतून् स्थावरजंग

मान् ॥ कांश्चित्शृंगं गिरेः शौर्यान्नयसांशु समानतां ॥४१॥ कांश्चित् सिंहान् समाकृष्य पातयामास भूतले ॥ आकृष्याथाहनत्स

ष्टे ताचेय ज्राभयस्तुनः ॥४२॥ कांश्चिन्नगौग्र ही त्वा तु कराभ्यां संमुखा बुधौ ॥ आस्फालयत्तदान्योन्यं कुंभाभ्यां स च ली

लया ॥४३॥ खमुत्पत्य समादाय स्वेच्छ रान्स उमासुतः ॥ चिक्षेप स हसा बालो विमानान्यवनीतले ॥४४॥ पुनरुत्सस्वेगेन

प्रेक्षमाणः खमंडले ॥ मार्गं रुरोध सूर्यं दीर्ग्रहाणां चतथैव सः ॥४५॥ उमात्यमेरुश्रृंगाणि द्रुतश्चेतश्च सो क्षिपत् ॥ प

र्वतांश्च विशेषेण नयश्चो मार्गतो नयत् ॥४६॥ त्रासितं तु जगत्सर्वं होमोदरपरस्त्रयं ॥ ततस्ते भ्रशमुद्विग्नाः शक्रं

शत्रु प्रतापनं ॥४७॥ ऊचुर्गत्वाद्विजश्रेष्ठा भूता वाक्यमिदं तदा ॥ अयमकार्युत पस्थो बौलो नोहंति चत्रहन् ॥४८॥

स्क१

त्वेषराज्यहर्त्ता चैव भविष्यति न संशयः ॥ पराक्रमाद्बलाच्चैव तथोत्साहाच्च तेजसः ॥ ४९ ॥ नूनं शतगुणेनायम
धिकत्वेन दृश्यते ॥ यदि सूदयसे नायं न त्वं सुखमवाप्स्यसि ॥ ५० ॥ करिष्यसि च नोऽस्माकं तव राज्यं भविष्यति ॥ उपे
क्षा नैव कर्त्तव्या शिशुं मत्वा पुरंदर ॥ ५१ ॥ एतद्विचार्य यत्नेन ततो बालं निषूदय ॥ एवमुक्तस्तदा तैस्तु भूतग्रामैः पु
रंदरः ॥ ५२ ॥ उवाच वचनं श्लक्ष्णं तेषां धर्मपरायणं ॥ ५३ ॥ इंद्र उवाच ॥ कथमुक्तमिदं भूता बालस्य हननं प्रति
॥ धर्मघ्नं पापसंघातं कीर्त्तिघ्नं वै चराचरे ॥ ५४ ॥ श्रूयतामभिधास्यामि धर्मशास्त्रस्य निश्चितं ॥ ऋषिभिश्च पु
रा दृष्टं पुराणेषु चराचराः ॥ ५५ ॥ आतुरं भीरुमुद्विग्नमंकस्थं शरणागतं ॥ स्त्रियमप्यथवा बालमंधं पंगुं तपस्वि
नं ॥ ५६ ॥ विलपंतं तथोन्मत्तं विश्वस्तं ब्राह्मणं तथा ॥ पतितं च प्रकोपं तं कामासक्तं निरायुधं ॥ ५७ ॥ नग्नं दीनं तथा
च कृहरोमाभ्यां समाश्रितं ॥ मुक्तकेशं तथा मत्तं सुप्तं च प्रवनौकसः ॥ ५८ ॥ सूदयिष्यंति ये मूढा नूनं ते नरकार्णवात्
॥ अनुत्थाना भविष्यंति गर्त्तस्था कुंजरा यथा ॥ ५९ ॥ तस्माद्व्रजध्वं शरणं यत्र शंभुसुतो गुहः ॥ नाहं बालवधं कर्त्तुमु
त्सहे स चराचराः ॥ ६० ॥ भूता ऊचुः ॥ गर्भो दितेर्यथा शक्र संरंभात्सूदितस्त्वया ॥ तदानीं ते गता कुत्र सा कृपोग्रभपा
तके ॥ ६१ ॥ अशक्यमिति मत्वैव नीतिमान् सिमानद ॥ अशक्यकर्मणि चिन्नो नीतिमान् पुरुषो भवेत् ॥ ६२ ॥ कश्चना
म नरः शूरो यो बालं रोषयेद्रणे ॥ अपि शक्र भवांस्तस्य वज्रकोटिनिपातनैः ॥ ६३ ॥ अप्येकमपि रोमाग्रं पतितुं नैव
शक्यते ॥ एवमुक्तस्ततस्तैस्तु भूतग्रामैः पुरंदरं ॥ ६५ ॥ आज्यधाराभिषिक्तोऽग्निर्यथैव प्रज्वलंस्तथा ॥ उवाचेदं वच

१९

स्तांश्च क्रोधयन्हि प्रदीपितः ॥६६॥ यत्र मुख्यं च हस्तेन वृत्रहा कुलिशायुधः ॥ इंद्र उवाच ॥ पुरा मया यथा गर्भो घाति
तश्च चराचरः ॥६७॥ दितेः कायं समाविश्य तत्र येदानीं निहन्यते ॥ अथ गत्वाहनिष्यामि पतंगमिव वह्निना ॥६८॥
यत्र हस्तं समादाय आहवे ब्रसहे तक्रः ॥ एवमुक्त्वा तदा शक्रः क्रोधानल समीरितः ॥६९॥ आज्ञापयत्तदा विप्राः सा
ध्यान् देवान् दिवाकरान् ॥ प्राराधानं गमिष्यामि च धार्यं बालकस्य च ॥७०॥ हंस कुंदेंदु वर्णाभं चतुर्दंतं महागजं ॥
आनयध्वं ममाग्रे तु करींद्रं मम नल्लभं ॥७१॥ जलधेरीव गंभीरं दीर्घहस्तं घनस्वनं ॥ तदैस दानवारःकां कुंजरं ध्रं भया
वहं ॥७२॥ तदा देशात्सुरैः स्तूर्ण सर्वायुधसमन्वितः ॥ निचे दितेः सुशक्रा यत्नमारु ख पुरंदरः ॥७३॥ विश्वेदेवैश्च साध्यैश्च
वसुभिश्च मरुद्गणैः ॥ आदित्यै रश्विनाभ्यां च ययौ स्कंदवधाय सः ॥७४॥ चित्रयन्नंडलमास्थाय स्तूयमानाश्च राच
रैः ॥ न्नृत्यमानाप्सरोभिश्च वाद्यमानैश्च किंनरैः ॥७५॥ गीयमानैश्च गंधर्वैः सुगीतैर्गवितश्चालिभिः ॥ नदद्भिश्च म
हासिंहैर्गर्ज्जद्भिश्च गजोत्तमैः ॥७६॥ हरिभिर्हेषमाणैश्च वायुवेगैर्महारथैः ॥ पताकाभिर्जयंतीभिर्ध्वजैः छत्रैश्च
चामरैः ॥७७॥ एवमायैरनेकैश्च नंदीश्वर द्वापरः ॥७८॥ दोधूयमानश्चमरैश्च दिव्यैर्जेगीयमानः सुरकिंनरीभिः
॥ पेपीयमानः सुरसुंदरीभिः कामातुराभिर्नयनै रजस्रं ॥७९॥ सपूज्यमानो मुनिसिद्धसंघैर्मुदान्वितो वज्रध
रः किरीटी ॥ कुमारमुद्दिश्य गतो थ वेगाद्धरिर्हरिवैर्दनुजान् यथैव ॥८०॥ इत्यादि सपुराणे एकोनषष्टितमोध्यायः
॥५९॥ ॥ सूत उवाच ॥ एवं गत्वा सहस्राक्षो यत्रास्ते पार्वतीसुतः ॥ बालसूर्यायुत प्रख्यं तमपश्यच्छचीपतिः ॥१॥

आदि०
५९
६०

प्रलयाग्निचयाकारं दृष्ट्वा नारदमब्रवीत्॥ इदं किं भाति देवर्षे मेरोः शतगुणो ह्ययं॥२॥ तेजसा व्याप्तभुवनं सर्वभूत
भयंकरं॥ एवं शक्रवचः श्रुत्वा भगवान्पद्मभूसुतः॥३॥ ऐरावतगजारूढं शचीपतिमथाब्रवीत्॥ नारद उवाच॥
योसौ देव त्वया न्यस्तो गर्भश्चैव सहामरैः॥४॥ तस्यैवैष प्रभावोयं नूनं देव शतक्रतो॥ भास्कराणां न पुंजोयं नैव
पर्वतसंचयः॥५॥ बालेनो सह्यमानेन मेरुर्देवेश्वरं जितः॥ अष्टौ योजनसंख्याभिः सहस्राण्येव षोडश॥
चतुराशीतिरुत्सेधो द्वात्रिंशद्विस्तारः स्मृतः॥ स गिरिः सकलो लोको मेरुः कांचनतां गतः॥७॥ तत्तेजः स्कंदतो
जातं सहस्रादेव मानद॥ चतुर्थ्यां माकृति देवपंचम्यामंगवांस्ततः॥८॥ षष्ठ्यां पद्भ्यां यथा चैष त्रैलोक्यं विज
यिष्यति॥ त्वया सहायः सप्तम्यां पालयिष्यति वा पुनः॥९॥ त्वं हि नूनं न शक्नोषि जेतुं वर्षशतैरपि॥ कुमारं वरदं
देवं पार्वतीनंदवर्द्धनं॥१०॥ नानाप्रहरणोपेतं नानाभरणभूषितं॥ मातृभिर्गणैश्चैव देवैश्च सेव्यमानमुमासुतं
॥११॥ एवं संजल्पमानोसौ जंभारिर्बालकं प्रति॥ वज्रं मुमोच वज्रारिः॥ स्फुलिंगोद्गारिभीषणं॥१२॥ तणवन्म
न्यमानो सौ वज्रंत पार्वतीसुतः॥ शरलोके न चिव्याध पपात स च मूर्छितः॥१३॥ पुनरन्यं समादाय शरं ज्वलन
सन्निभं॥ छत्रं ध्वजं पताकाश्च हर्षच्छिछेद षण्मुखः॥१४॥ बिभेदान्येन तीक्ष्णेन हस्तं वै चक्रिणो गुहः॥ शरेणाग्नि
तुल्येन पुरं शंभुर्यथाहवे॥१५॥ पुनर्बाणं समादाय तत्तं जघान शतक्रतुं॥ बिभेदान्येन तीक्ष्णेन मुकुटं तु ततो ह
रेः॥१६॥ शरेणावन्हितुल्येन चिच्छेद च सलीलया॥ धर्मं च पंचभिर्बाणैर्निर्जित्तिं दशभिर्गुहः॥१७॥ दशपंचश

२३ २०

ऐरावणं वरुणं चापि भेदसः ॥ विंशद्भिर्वायुदेवं च विंशं च दशपंचभिः ॥१८॥ त्रिंशद्भिः सोमराजानं ताडयित्वा र
णे पुनः ॥ शक्रं पंचाशतैर्वाणैः शरैश्च प्राणहारिभिः ॥१९॥ अन्यानपि सुरान्स्कंदस्त्रिभिर्द्विः पंचभिः शरैः ॥
शूरो नादं प्रमुंचन्वै शक्रं दुद्राव शंभुजः ॥२०॥ वसुभिश्च तथादित्यैर्मरुद्भिश्च महाबलैः ॥ कृत्तशस्त्रकरैर्बा
लसिंहैर्मारमराडिव ॥२१॥ ततस्तानागतान्दृष्ट्वा देवान्शंकरस्य च कूर्मः ॥ केसरीच मृगान्क्षुद्रान्दुद्राव तान्
दिवौकसः ॥२२॥ पुनस्कंदं सहस्राक्षो वज्रेण समताडयत् ॥ ताडितेन तु तत्रस्तस्मादुसन्नाश्वारुमूर्त्तयः ॥२३॥
त्रयो देवाश्च येदाश्च लोकाश्चाग्निदिवाकराः ॥ ततश्चैवं दं सहस्राक्षं च दृष्ट्वा बुद्धिर्बृहस्पतिः ॥२४॥ देवमंत्री महा
प्राज्ञो भारतीपतिरब्रवीत् ॥ अलं युद्धेन देवेश महादेवस्य सूनुना ॥२५॥ हितं पदोत्तं वे क्ष्येहं सहस्राक्ष शृणुष्व
तत् ॥ यदिच्छसि सुखं भोक्तुं कुरुष्व वचनं मम ॥२६॥ अनेन सह संप्रीतिं कृत्वा राज्यमकंटकं ॥ भुंक्ष्व त्वं निश्च
लं कृत्वा दानवांश्च निषूदय ॥२७॥ यस्य चक्रापि पातेन नार्त्तिः स्वल्पापि जायते ॥ हंतव्यः स कथं शक्र शक्त संख्ये
भयावहं शरैः ॥२८॥ सूत उवाच ॥ श्रुत्वा तस्य वचः शक्रस्तदा सुरगुरोर्द्विजाः ॥ तमेव शरणं प्राया कुमारं पार्वती
सुतं ॥२९॥ प्रसीद मे त्वं शरणागतस्य पादौ तवाहं शिरसा च हामि ॥ सुराधिपस्त्वं भव शर्वसूनो गृहाण राज्यम
मरं प्रभुकल्प ॥३०॥ एषोंजलिः पंकजचारुनेत्र कृतोन्तमांगे अहिमन्युमुग्रं ॥ सतां हि कोपः प्रणते पुनि संवि
नाशाय सर्विजनस्य सिद्धिं ॥३१॥ अथैंद्रवचनं श्रुत्वा भगवान्षण्मुखस्तदा ॥ अब्रवीत्करुणाविष्टः शक्रं

त

आदि०
५०

प्रतिमुनीश्वराः॥३२॥ स्कंद उवाच॥ करोमि किमिदं राज्यं भोग्यैश्वर्याश्च तैरलं॥ अपर्याप्तं न मे किंचिदस्ति पित्रोः प्रसा
दतः॥३३॥ निःकंटकं त्वमेवेह राज्यं कुरु शचीपते॥ मम सख्येन सकलान् जहि शत्रून् पुरंदर॥३४॥ एवं स्कंदवचः श्रुत्वा
पुनः प्राह शचीपतिः॥ भगवन्नापरः कश्चिद्देवानां विहितो बली॥३५॥ तस्मात्कुरु त्वमेवेह राज्यमीश्वरनंदन॥ क्व बा
लः क्व च संग्रामः क्व नीतिं क्व पराक्रमः॥३६॥ क्व ज्ञानमतुलं देव क्व मतिः क्व च सौम्यता॥ क दया क्व च दाक्षिण्यं क्व क्षांति
क्व प्रसादता॥३७॥ अलं त्वमेव राज्यस्य गुणैरेभिरुदीरितः॥ स्वरूपैः स्वगुणैस्त्वं हि वंदिभिश्चारणैस्तथा॥३८॥ विद्या
धैर्यैश्वर्यपक्षैश्च विविधैर्गुणकोटिभिः॥ स्तूयमानोमरैः सिद्धैर्गंधर्वाप्सरसांगणैः॥३९॥ अहं सेनापतिर्देव भवामि भव
नंदन॥ तिष्ठ त्वोपरि कृत्स्नस्य त्रैलोक्यं भुंक्ष्व सुव्रत॥४०॥ सर्वतः सर्वपूज्यस्त्वं यथा देवो महेश्वरः॥ एवं शक्रवचः श्रु
त्वा पुनः प्राहांबिकासुतः॥४१॥ स्कंद उवाच॥ अभयं शक्र मा भैषीः कुरु राज्यमकंटकं॥ इंद्रस्त्वं देवराजस्त्वं त्वमेव ज
गतः प्रभुः॥४२॥ दर्प्यगर्वचलोद्दीर्णा दानवा ये च तांस्तदा॥ यैः पराजीयसे सर्वं सूदयेहं त्वयास्मृतः॥४३॥ वक्कालापैर
लं शक्रगदितेन पुनः पुनः॥ निश्चयेन सखाहं ते भवाम्यसुरसूदन॥४४॥ अथोवाच महादेवः पुत्रं संवीक्ष्य निःस्पृहं
नेष्ठं त्वयापि हि इंद्र त्वं भव सेनापतिर्गुह॥४५॥ एवमस्त्विति तं प्राह कार्त्तिकेयं शचीपतिः॥ ततः सर्वैः सुरैर्विप्रा आ
देशात्परमेष्ठिनः॥४६॥ अभिषिक्तो यथाविधिना सेनापत्ये तदा गुहः॥ यावद्दत्तं कुमाराय सेनापत्यं सुराज्ञया॥४७॥
हंतुमभ्यागतस्तूर्णं कुमारं तारकस्तदा॥ आगतं तं तदा वीक्ष्य लीलया पार्वतीसुतः॥४८॥ ददाहाशु महादेसं तूलं चान्ति

२

रिपाहवे॥दग्ध्वातुतारकंघोरंपतंगमिवपावकः॥४९॥ततःप्रीतमनाःस्कंदोमातुरंकमुपाविशत्॥महादेवोपिभ
गवान्वेधादिन्विष्णुनासह॥५०॥विसृज्यगणपैःसार्द्धंक्षणादंतर्हितोभवत्॥यइमंपठतेध्यायंश्रुत्वावाभक्तिसंयु
तः॥५१॥सर्वाण्यघानिलीयंतेयातिशंभोःपरंपदं॥५२॥इत्यादिसपुराणेषष्टितमोध्यायः॥६०॥ ॥ऋषयऊचुः॥
कथितोभगवन्सूतविवाहःपरमेष्ठिनः॥उत्पत्तिंकार्त्तिकेयस्यतस्यचैवपराक्रमः॥१॥सेनापत्यंयथादत्तंश्रुतं
सर्वमशेषतः॥भक्तियोगमथेदानींवदसूतमहामते॥२॥तृप्तिर्नास्त्याप्यभूतस्माच्छ्रुत्वाचैवपुनःपुनः॥जाना
सित्वंभगवतोमाहात्म्यंत्रिपुरद्विषः॥३॥त्वंपासितोयतःसम्यग्भगवान्बादरायणः॥यत्प्रसादात्त्वयालब्धंज्ञानं
तत्पारमेश्वरं॥४॥दुर्लभंसर्वशास्त्रेषुमुनीनांचमहात्मनां॥सूतउवाच॥यदुक्तंब्रह्मणापूर्वंनारदायमहात्मने॥५
प्रीतेनमनसातेनतच्छृणुध्वंद्विजोत्तमाः॥सत्यलोकेसमासीनंब्रह्माणंतेजसांनिधिं॥६॥ऋषिभिर्मुनिभिःसिद्धै
र्वेदैःसांगैरुपासितं॥संगीयमानंगंधर्वैःस्तूयमानंमरुद्गणैः॥७॥दृष्ट्वाप्रणम्यविधिवन्नारदस्तमथाब्रवीत्॥
नारदउवाच॥देवदेवजगन्नाथचतुर्मुखसुरोत्तम॥८॥भक्तियोगस्यमाहात्म्यंवददेवस्यशूलिनः॥तातत
मेकथयस्वाद्यभवबंधविमोचनं॥९॥ब्रह्मोवाच॥प्रणम्यशंकरंशांतमप्रमेयमनामयं॥परंज्योतिरनाद्यंतं
निर्गुणंतमसःपरं॥१०॥भक्तियोगंप्रवक्ष्यामिशृणुनारदसुव्रत॥भक्तियोगस्यमाहात्म्यंयथाशंभोर्मयाश्रुतं॥
भक्तिर्भगवतःशंभोर्दुर्लभासकलैर्देहिनां॥कथंचिद्यदिसालब्धातेषांनास्तिसुदुर्लभं॥१२॥भक्त्यैवप्राप्यतेराज्यमिं

आदि०
६१

द्रत्वं मम्परं च यत्॥ विष्णुत्वमपि मुक्तिं च नूनं प्राप्नोति नारद॥१३॥ शुभानामशुभानां च कर्मणां राशिसंचयं॥ करो
ति भस्मसाद्भक्तिर्भवस्याग्निरिवेंधनं॥१४॥ म्लेच्छोपि वा यदि भवे भवभक्तिसमन्वितः॥ न तत्समश्चतुर्वेदी नाग्निष्टो
मादियज्ञकृत्॥१५॥ अपि पापानि घोराणि सदा कुर्वन्नरो यदि॥ लिप्यते नैव पापैस्तु भक्तो भवति चेच्छिवे॥१६॥ शिवभ
क्ता महात्मानो मुच्यंते ते न संशयः॥ अपि दुष्कृतकर्माणः प्रसादाच्छूलिनो मुने॥१७॥ सकृत्पूजयते यस्तु भगवंतमुमा
पतिं॥ अश्वमेधादधिकं फलं भवति नारद॥१८॥ जीवितं च चलं ज्ञात्वा पद्मपत्रस्थितोदकं॥ भक्तो दूरं तान्नरकान्न
रः कुर्याच्छिवे भक्तिं॥१९॥ शिवे भक्तिं प्रकुर्वाणः संसारादतिभीषणात्॥ मुच्यते मुनिशार्दूल भक्तिः शर्वे ति दुर्लभा॥२०
भवव्यालमुखस्थानां भीरूणां देहिनां मुने॥ तस्माद्धि मोचकस्तेषां महादेव इति श्रुतिः॥२१॥ भक्तिः शिवे यदि भवे
न्नकस्मात्कस्यचिद्ध्रुवं॥ भवार्णवं तरत्येव प्रसादात्परमेष्ठिनः॥२२॥ स्वर्गार्थिनां मुमुक्षूणां ब्रह्मत्वमपि कांक्षिणां॥
भक्तिरेव विरूपाक्षे नान्यपंथा इति श्रुतिः॥२३॥ आदिमध्यांतरहिते पिनाकिनि जगत्पतौ॥ सदा मनीषिभिः कार्या भ
क्तिरेव हि नारद॥२४॥ सर्वमन्यत्परित्यज्य भक्तो भव भवे मुने॥ मुक्तो भविष्यसि क्षिप्रं तस्य शंभोरनुग्रहात्॥२५॥ य
स्य प्रसादलेशेन ब्रह्मत्वं प्राप्तवानहं॥ विष्णुत्वमपि विष्णुश्च स शिवः केन सेव्यते॥२६॥ शिवे दानं शिवे होमः शि
वे स्नानं शिवे जपः॥ अक्षयाणि फलान्येषामित्याह भगवान्भवः॥ कुरुक्षेत्रे नियतस्तां यत्फलं नैमिषे तथा॥ प्रयागे
च प्रभासे च गंगासागरसंगमे॥२८॥ रुद्रकोट्यां गयायां च शालग्रामे महेश्वरे॥ पुष्करे भारभूतेशे गोकर्णे मंडलेश्व

२३

रे॥२९॥ तत्फलं द्वियसे नैव भक्त्या भर्गार्चनाद्भवेत्॥ नास्ति लिंगार्चनात्पुण्यमधिकं भुवनत्रये॥३०॥ लिंगेऽर्चिते तु वि
र्लोकिश्च मर्चितः स्यान्न संशयः॥ मायया मोहिताः सर्वे नो न जानंति महेश्वरं॥३१॥ अनुग्रहाद्भगवतो जानंते च हि नार
द॥ यः पूजितं शिवं दृष्ट्वा प्रणमेद्भक्तिभावतः॥३२॥ पुंडरीकस्य यज्ञस्य फलं भवति निश्चितं॥ पृथिव्यां यानि तीर्था
नि पुण्यान्यायतनानि च॥३३॥ शिवलिंगे च संस्थितानि सर्वाणि नारद॥ तस्माल्लिंगं सदा पूज्यं भक्तिभावेन नित्यशः॥
३४॥ स्नातः सर्वतीर्थेषु सर्वस्मादधिकश्च सः॥ यस्तु लिंगार्चनं स्नात्वा रेवान्यांश्च पूजयेत्॥३५॥ रत्नां वेसह हाय
मूढास्ता यथा कामपेक्षते॥ चतुर्दश्यामष्टम्यां पौर्णमास्यां तथैव च॥३६॥ अमावास्यां च यो भक्त्या पूजये
द्विंदुसेश्वरं॥ स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥३७॥ शिवलोकमवाप्नोति देहांते दुर्लभं मुने॥ शिवार्चनरतो
नि संमहापातकसंभवैः॥३८॥ दोषैः कृतैर्न लिप्येत पद्मपत्रमिवांभसा॥ दर्शनाच्छिवभक्तानां संस्पर्शसंभाषणाद
पि॥३९॥ अतिरात्रस्य यज्ञस्य फलं भवति नारद॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यः सजातिजः॥४०॥ शिवभ
क्तः सदा पूज्यः सर्वावस्थां गतोऽपि वा॥ नास्याचारं परीक्षेत न कुलं न व्रतं तथा॥४१॥ त्रिपुंड्रांकितभालेन पूज्य
एव हि नारद॥ कर्मणा मनसा वाचा यस्तु भक्तान्विनिंदति॥४२॥ निरयान्निष्कृतिर्नास्ति तस्य मूढात्मनो मुने॥ शि
वभक्तान्यजीयित्वा सर्वेशं सकोयमः॥४३॥ यः पुनः शिवभक्तानां शिव एव न चापरः॥ न शिवाश्रमिणो मौंजी न
दंडेन च कुंडले॥४४॥ नैव काषायवासांसि भक्तिरेवात्र कारणं॥ यदि भक्ताः पशुपतौ पापकर्मसु ये रताः॥४५॥

आदि०
६१

यमस्य सदनं तेपि नैव पश्यंति नारद ॥ ये पुनः शांतमनसः शिवभक्ता जितेंद्रियाः ॥४६॥ मर्त्यधर्मं समासाद्य विलो
यास्ते गणेश्वराः ॥ मृतस्य जीवतो वापि शिवभक्तस्य नारद ॥४७॥ यमाद्भयं न तस्यास्ति राजन्नश्चैव तु का कथा ॥
आश्चर्यं कथयिष्यामि चरितं शृणु वै पुरा ॥४८॥ उज्जयिन्यां नृपो ह्यासीन्नाम्ना सत्यध्वजो मुने ॥ धर्मात्मा सत्यसं
कल्पः प्रजापालनतत्परः ॥४९॥ भुक्त्वा सपत्नीमवनीं काले नाथ दिवं गतः ॥ यस्तु तस्येति ख्यातः पुत्रस्तस्य महा
मनः ॥५०॥ महाकालार्चनरतस्तन्निष्ठस्तत्परायणः ॥ न धर्मेण प्रजाः शास्ति राजधर्मबहिष्कृतः ॥५१॥ असा
धून् संपरित्यज्य साधून्वै हंस्यसौ नृपः ॥ प्रजानां कुशलं नास्ति सर्वत्र परिपंथिनः ॥५२॥ यज्ञांश्च यज्वनो दुष्टाम्ले
च्छा विध्वंसयंति तान् ॥ गते वर्षसहस्रे तु राज्ये तस्मिन्च सुश्रुते ॥५३॥ स तु काले यसं प्राप्तो देहिनीमति भीषणः ॥
पापिष्ठ इति तं मत्वा संप्राप्ता यमकिंकराः ॥५४॥ शिवभक्त इति प्राप्तास्त्रिनेत्राः शूलधारिणः ॥ शिवदूतैः समा
नीतं विमानं सार्वकामिकं ॥५५॥ यमदूतास्तु ते क्रूराः पाशदंडासिपाणयः ॥ आरुह्य तु स्थिताः सर्वे नृपं ते यमकिं
कराः ॥५६॥ गणेश्वरास्ततः क्रुद्धा दृष्ट्वा तान्यमकिंकरान् ॥ त्रिशूलैर्मुद्गरैश्चक्रैर्गदाभिर्मुसलैस्तथा ॥५७॥ ता
डयित्वा भृशं दूतान्यमशासनपालकान् ॥ नीतः शिवपुरं दिव्यं पुनरावृत्तिदुर्लभं ॥५८॥ अथ ते किंकराः सर्वे प
भंगास्त्वेदमब्रुवन् ॥ किंकरा ऊचुः ॥ शृणु धर्म यथा वृत्तमीश्वरस्य गणेश्वरैः ॥५९॥ सर्वान्समस्तास्ताडयित्वा नीतः
पापो च सुश्रुतः ॥ न यज्ञैर्यजते देवान्न विप्रान्नातिथीन्नपि ॥६०॥ न धर्मेण प्रजाः पाति कथं शिवपुरं गतः ॥ त

२२

४६

त्वं धर्मस्य जानासि धर्मदंडधरो भवान् ॥६१॥ तस्माद्ब्रूहि हि भगवान् त्वाज्ञाकारिणो वयं ॥ इति तेषां वचः श्रुत्वा धर्म
राट् सूर्यनंदनः ॥६२॥ वचः प्रोवाच गंभीरं किंकरान् प्रति नारद ॥ यम उवाच ॥ देवासुरमनुष्याणां सर्वेषां प्राणिनामपि
पि ॥६३॥ शास्ताहं नात्र संदेहः शिवभक्तमृते किल ॥ माहात्म्यं शिवभक्तानां के वा विंदंति तत्त्वतः ॥६४॥ तेषां नि
यंता भगवान् महादेवो न चापरः ॥ शिवभक्ता महात्मानः सदा शर्वार्चने रताः ॥६५॥ अप्याश्रमाचारहीनास्सज्ज
ध्वं तान् प्रयत्नतः ॥ वर्णाश्रमाचाररतोप्यथ ते न विवर्जितः ॥६६॥ शंकरे यदि भक्तस्यान्नशास्यः पूज्य एव हि ॥
भवद्भिः परिहर्तव्याः शिवभक्ताः प्रयत्नतः ॥६७॥ पापकर्मस्वपि रतास्तेषामेनो न विद्यते ॥ बिभेमि शिवभक्तेभ्यः
सिंहादिव यथा मृगः ॥६८॥ श्वेतस्याहरणे पूर्वमहं देवेन घातितः ॥ ततः प्रभृत्यहं शास्ता तद्भक्तानां न किंकराः
॥६९॥ महाकालं पूजयंति भक्त्या विभवविस्तरैः ॥ यो सौ च सुभ्रूतो राजा न प्रजाः पातियद्यपि ॥७०॥ तथापि शंक
रे भक्तो मनोवाक्कायकर्मभिः ॥ तस्माद्भवद्भिस्ते मान्याः पूज्याश्च वा विशेषतः ॥७१॥ प्रसादात्तस्य देवस्य पापं स्पृ
शाति तं कथं ॥ सकृत्स रूपति यो देवं महाकालं त्रिलोचनं ॥७२॥ सर्वपापविनिर्मुक्तो याति शैवं परं पदं ॥ यः
सदार्चयते देवं महाकालं तमीश्वरं ॥७३॥ गणेश्वरसमं तस्यो भवद्भिरिति किंकराः ॥ एवं यमस्य वचनं श्रु
त्वा ते यम किंकराः ॥७४॥ तूष्णीमासाद्यते सर्वे बभूवुर्विगतज्वराः ॥ तस्मात्पूज्यो महादेवस्तद्भक्ताश्च विशे
षतः ॥७५॥ भक्तानां पूजनाच्छंभुः प्रीतो भवति नारद ॥ शिवस्य निसर्व स्याकिं नामाक्रियते जनैः ॥७६॥ यस्त

५

आदि०
६२

तं शिवभक्तानां तेन प्रीतो भवेच्छिवः ॥ देवान्सर्वान्परित्यज्य भज नारद शंकरं ॥ ७७ ॥ इत्यादिस्यपुराणे एकषष्ठि
तमोध्यायः ॥ ६१ ॥ ॥ श्री ब्रह्मोवाच ॥ पंचाक्षरेण मंत्रेण पत्रं पुष्पमथापि वा ॥ यः प्रयच्छति शर्वाय तदनंतफलं
स्मृतं ॥ १ ॥ सप्तकोटीर्महामंत्राः शिववक्त्राद्विनिर्गताः ॥ पंचाक्षरस्य मंत्रस्य कलां नार्हंति षोडशीं ॥ २ ॥ दीक्षि
तोऽदीक्षितो वापि विधानादन्यथापि वा ॥ पंचाक्षरं जपेद्यस्तु शिवस्यानुचरो भवेत् ॥ ३ ॥ अपि कृत्वा भ्रूणहत्यां
पापादन्याद्बहून्यपि ॥ पंचाक्षरजपात्सद्यो मुच्यते नात्र संशयः ॥ ४ ॥ नहि पंचाक्षरजपात् श्रेयोऽस्ति भुवनत्रये ॥
एवं ज्ञात्वा जपेद्विद्वान्विद्यां पंचाक्षरीं शुभां ॥ ५ ॥ पंचाक्षरेण मंत्रेण बिल्वपत्रैः शिवार्चनं ॥ करोति श्रद्धया यस्तु
स गच्छेदैश्वरं पदं ॥ ६ ॥ दर्शनाद्बिल्ववृक्षस्य स्पर्शनाद्वंदनादपि ॥ अहोरात्रकृतं पापं नश्यत्येव हि नारद ॥ ७ ॥ अंत
कालेन रोयस्तु बिल्वमूलस्य मृत्तिकां ॥ आलिप्य सर्वगात्राणि मृतो याति परां गतिं ॥ ८ ॥ बिल्ववृक्षं समासाद्य
द्वादशाहमभोजनं ॥ यः कुर्याद्भ्रूणहापापान्मुक्तो भवति नारद ॥ ९ ॥ बिल्ववृक्षं समाश्रित्य त्रिरात्रोपोषितः शुचिः
हरनाम जपेल्लक्षं भ्रूणहत्यां व्यपोहति ॥ १० ॥ बिल्वपत्रैरखंडैस्तु पूजयेदिंदुशेश्वरं ॥ कृष्णाष्टम्यां संयतात्मा ब्रह्महत्यां
व्यपोहति ॥ ११ ॥ मातृहा पितृहा वापि युक्तो वा सर्वपातकैः ॥ माघे कृष्णचतुर्दश्यां पूजयेदिंदुशेश्वरं ॥ १२ ॥ भक्त्या
बिल्वदलैर्मौनी हरनाम जपन्निशि ॥ सर्वपापविनिर्मुक्तो याति शैवं परं पदं ॥ १३ ॥ शुद्धैः पर्युषितैः पत्रैरपि बिल्व
स्य नारद ॥ पूजयेद्गिरिजानाथं मुच्यते सर्वपातकैः ॥ १४ ॥ अर्घ्यपुष्पफलोपेतं यः शिवाय निवेदयेत् ॥ सर्वपापविनि

२४

98

[OrderDescription]
,CREATED=06.10.20 11:00
,TRANSFERRED=2020/10/06 at 11:06:55
,PAGES=48
,TYPE=STD
,NAME=S0003898
,Book Name=M-1033-AADITYA PURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,